# NIRUKTA AND MIMAMSA

## SKT4 C11

## IV SEMESTER

## Core Course

## M.A. SANSKRIT SAHITYA

**UNIVERSITY OF CALICUT,**
**School of Distance Education,**
**Calicut University P.O.,**
**Malappuram - 673 635, Kerala.**

**190263**

# University of Calicut

## School of Distance Education,

## Study Material

## IV SEMESTER

### Core Course

## M.A. SANSKRIT SAHITYA

## *NIRUKTA AND MIMAMSA*

**Prepared By:**

***Dr. Sooraj R.S.,***
*Guest Faculty, Dept. of Sanskrit Sahitya,*
*Sree Sankaracharya University of Sanskrit Regional Campus Ettumanoor, Kottayam.*

**Scrutinized By:**

***Dr. Indira. K,***
*Assistant Professor in Sanskrit,*
*School of Distance Education,*
*University of Calicut.*

***DISCLAIMER***

"The author shall be solely responsible for the content and views expressed in this book"

# CONTENTS


| | | | |
|---|---|---|---|
| **Unit I:** | **Nirukta** | **-** | **5** |
| **Unit II:** | **Mimamsa: Manameyodaya (Pratyaksha and Anumana only)** | **-** | **35** |

# Unit I

## वेदाङ्गानि

वेदाङ्गस्यार्थस्तथा तस्य महत्त्वम् अङ्गशब्दस्य व्युत्पत्तिलभ्यः अर्थोऽस्ति– उपकारकः । -'अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि ।' अर्थाद् येन कस्याऽपि वस्तुनः स्वरूपज्ञाने साहाय्यं मिलति तमङ्गमिति कथ्यते। वेदः स्वयमेवैकः दुरूहो विषयोऽस्ति। तदर्थज्ञाने, कर्मकाण्डस्य प्रतिपादने यान्यूपयोगीनि शास्त्राणि सन्ति तान्येव वेदाङ्गानि भवन्ति। वेदस्य यथार्थज्ञानलाभाय षण्णां विषयाणां ज्ञानमपेक्षितं भवति। वेदमन्त्राणामवितथोच्चारणमेव प्रथममावश्यक वस्त्वस्ति। शब्दमयमन्त्राणां यथार्थोच्चारणाय प्रवर्त्तमानं वेदाङ्ग 'शिक्षा' इत्यभिधीयते । वेदस्य मुख्यप्रयोजनं वैदिककर्मकाण्डस्य यज्ञयागस्य च यथार्थानुष्ठानमस्ति। अस्मिन्नर्थ प्रवृत्तमङ्गं 'कल्प' इति कथ्यते। कल्पस्य व्युत्पत्तिलभ्योऽर्थो भवति 'कल्प्यते समर्थ्यते यागप्रयोगोऽत्र' इति । वेदानां रक्षकत्वाद्, वेदार्थावबोधने सहायकत्वात् प्रकृतिप्रत्यय उपदेशपुरःसरपदस्वरूप- प्रतिपादकत्वादर्थ- निर्णयनकृत्साधनेष्वन्यतमसाधनत्वेन प्रयुक्तत्वाद् व्याकरणं नाम वेदाङ्गः नितान्तमेव महनीयं श्रेष्ठञ्च अङ्गमङ्गेषु स्मृतम् । निरुक्तस्यास्ति विषयः-वैदिकपदानां व्युत्पादनम्। निरुच्यते निश्शेषेणोपदिश्यते तत् तदर्थावबोधनाय पदजातं यत्र तन्निरुक्तमिति कथ्यते । वेदाः सन्ति छन्दोबद्धाः । अतस्तेषामुच्चारणनिमित्ताय छन्दोज्ञानं नितरामपेक्षितम् । वरुणस्य विषये शुनःशेपऋषेः प्रख्यातोऽयं मन्त्रोऽस्ति

"निषाद धृतवतो वरुणः पस्त्यास्वा।

साम्राज्याय सुक्रतुः ॥

यज्ञभागा बहुविधाः सन्ति । केचन यज्ञा एवंविधा विधाने नीता ये संवत्सरसम्बन्धिनः सन्ति । केचन क्रतुसम्बन्धिनो वर्त्तन्ते । केचन च तिथि-मास-पक्षनक्षत्रपरकाः सन्ति । तस्माज्ज्यौतिषं नाम वेदाङ्गमपि नैजं वैशिष्ट्यं निदधाति ।

संक्षेपेण वैदिकमन्त्राणामुचितोच्चारणाय शिक्षायाः, कर्मकाण्डस्य यज्ञीयानुष्ठानस्य च निमित्ताय कल्पस्य, शब्दानां रूपज्ञानाय व्याकरणस्य, अर्थज्ञानाय निर्वचनाय च निरुक्तस्य, वैदिकच्छन्दसां ज्ञानलाभाय छन्दसस्तथाऽनुष्ठानस्योचितकालनिर्णयार्थं ज्योतिषशास्त्रस्य च प्रयोजनमस्ति ।

आधुनिकानामितिहासकाराणां कथनमिदं यत् षण्णामपि वेदाङ्गानां निर्माणं वैदिकयुगस्योत्तरार्द्धभागेऽभवत् । शिक्षा, व्याकरणम्, कल्पः, निरुक्तम्, छन्दः, ज्यौतिषञ्च इत्येतानि वेदाङ्गानां सन्ति नामानि । पाणिनीयशिक्षा प्राह

'शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः । ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ॥'

'छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।

ज्योतिषामयनं चक्षुनिरुक्तं श्रोत्रमुच्यते ॥

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।

तस्मात् साङ्गमधीत्येव ब्रह्मलोके महीयते ॥' (पा०शि० ४१।४२)

पतञ्जलिनाऽप्युक्तम्- 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' ( पस्पशाह्निके ) ।

षण्णामप्येतेषां वेदाङ्गानामुल्लेखो गोपथब्राह्मणबौधायनधर्मसूत्र-गौतमधर्मसूत्र-रामायणसमेषु प्राचीनग्रन्थेषूपलभ्यते । एतेन तेषां पुरातनतरत्वं सिद्ध्यति । बुद्धावतारात्प्राग्वर्तीकाल उत्तरवैदिककालत्वेन निर्धार्यते बुधः । वेदानां भाषा भावश्च

उभावपि दुरूहौ स्तस्तस्माद् वेदार्थावगमनाय वेदाङगानामपेक्षा भवति। वेदार्थबोधाय सहायकत्वात् तेषामुपकारकत्वं स्पष्टमेव।

## निरुक्तम्

निरुच्यते निश्शेषेणोपदिश्यते तत् तदर्थावबोधनाय पदजातं यत्र तनिरुक्तमिति कथ्यते । निरुक्तं निघण्टोर्महत्त्वपूर्णा टीकाऽस्ति । निघण्टौ वेदस्य कठिनशब्दानां समुच्चयमस्ति । निघण्टुग्रन्थस्य सङ्ख्याविषये पर्याप्तं मतभेदमस्ति । सम्प्रति समपलब्धो निघण्टुग्रन्थ एक एवास्ति, किञ्च प्राचीनपरम्पराया अनुशीलनेन ज्ञातो भवति यन्निघण्टुग्रन्था अनेके सन्ति। निरुक्तस्यारम्भे 'निघण्टुम्' 'समाम्नाय' इत्येतेन पदेनाभिधीयते । तेनास्य प्राचीनत्वं प्रमाणितं भवति । महाभारतस्य मोक्षधर्मपर्वानुसारेणास्य निघण्टो रचयिता प्रजापतिकश्यपः आसीत् -

'वषो हि भगवान् धर्मः ख्यातो लोकेषु भारत।

निघण्टुकपदाख्याने विद्धि मां वषमुत्तमम्॥

कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते।

तस्माद् वृषाकपि प्राह कश्यपो मां प्रजापतिः॥' (महा० मो. ध. प अ. ३४२, श्लो० ८६-८७ )

वर्तमाने निघण्टुग्रन्थे 'वृषाकपिः शब्दः सङ्ग्रहीतोऽस्ति । अतः पूर्वोक्तकथनानुसारेण ज्ञातो भवति यन्महाभारतकालेऽस्य निघण्टुग्रन्थस्य निर्मातृपदेन प्रजापतिः कश्यपः एव प्रख्यात आसीत् । निघण्टौ पञ्चाध्यायाः सन्ति । आदिमस्त्रयोऽध्याया निघण्टुककाण्डम् इत्यभिधीयते। चतुर्थोऽध्यायो नैगमकाण्डम्, पञ्चमोऽध्यायो दैवतकाण्डमिति पदेन व्यपदिश्यते । प्रथमतस्त्रिष्वध्यायेषु पृथिव्यादिबोधकानामनेकशब्दानामेकत्र सङ्ग्रहोऽस्ति । द्वितीयकाण्डमेकपदीयमपि कथ्यते । 'नैगमः' इत्येतस्य पदस्य तात्पर्यमिदमस्ति यदेतस्य प्रकृतिप्रत्ययस्य

यथार्थावगमनं न भवति – 'अनवगतसंस्कारांश्च निगमान् ।' दैवतकाण्डे देवतायाः स्वरूपस्थानयोनिर्देशो मिलति ।

## निघण्टु-व्याख्याकाराः

सम्प्रति निघण्टुग्रन्थस्यैका एव व्याख्या समुपलब्धा भवति । अस्या व्याख्याया रचयिता देवराजयज्वाऽस्ति । अस्य पितामहस्यापि नाम देवराजयज्वा एवासीत् । अस्य पितुर्नाम यज्ञेश्वरोऽस्ति । अयं हि विद्वान् 'रंगेशपुरी' इत्याख्यस्य नगरस्य पार्श्ववत्तिनः कस्याऽपि ग्रामस्य निवासी आसीत् । नाम्ना प्रतीतो भवति यदयं विद्वान् सुदूरदक्षिणभारतस्यैव निवासी आसीत् । अस्य समयस्य विषये मतद्वयं प्रचलितमस्ति । केषाञ्चिद्विदुषां मते विद्वानयं सायणात्परवर्ती आसीत्, किञ्च यथार्थतः सायणात्पूर्ववर्ती एवायमासीत् । आचार्यसायणेन ऋग्वेदीयमन्त्रस्य ( १।६२।३) स्वकीये भाष्ये निघण्टुभाष्यवचनस्योल्लेखः कृतः । उल्लेखोऽयं देवराजयज्वनः भाष्येऽपि किञ्चित्पाठान्तरेण समुपलब्धो भवति । अस्माद्भाष्याददतिरिक्तं न कमप्यन्यं निघण्टुभाष्यं विद्यमानमस्ति । देवराजयज्वा स्वभाष्यस्योपोद्घाते क्षीरस्वामिनस्तथाऽनन्ताचार्यस्य निघण्टुव्याख्यायारुल्लेखं कृतवानस्ति । यथा-'इदं च क्षीरस्वामी अनन्ताचार्यकृतां निघण्टुव्याख्यां......."निरीक्ष्य क्रियते ।'

अनन्ताचार्यस्योल्लेखोऽत्र प्रथम एवास्माकं मिलति । क्षीरस्वामिनो मतस्योल्लेखोऽत्र बहुलतया कृतोऽस्ति । क्षीरस्वामी अमरकोशस्य प्रसिद्धः टीकाकारोऽस्ति । यज्वन उद्धरणम् 'अमरकोशोद्घाटने' यथावदुपलब्धं भवति । अतो निघण्टुव्याख्यया यज्वनेऽभिप्रायः अस्यामरकोशस्यैव व्याख्यया प्रतीतो भवति । अस्य भाष्यस्य नाम निघण्टुनिर्वचनमस्ति । स्वप्रतिज्ञानुसारेण देवराजयज्वा निघण्टुककाण्डस्यैव निर्वचनमधिकेन विस्तरेण कृतवान् ('विरचयति देवराजो नैघण्टककाण्डनिर्वचनम् श्लो० ६) । अन्यकाण्डानां व्याख्याऽत्यल्पाऽऽकाराऽस्ति । अस्य भाष्यस्योपोद्घातो वैदिकभाष्यकर्तृणामिति वृत्तावबोधनाय नितान्तं प्रयोजनीयोऽस्ति । अस्मिन्नुपोद्घाते स्कन्दस्वामिनः ऋग्भाष्यटीकातः, महेश्वरस्य निरुक्तभाष्यटीकातश्च साहाय्यं गृहीतमस्ति । प्राचीनप्रामाण्यादपि सुष्ठूद्धरणानि

सन्त्यनेकानि च । सायणात्पूर्ववत्तित्वेनास्य व्याख्यायास्तथा निरुक्तेश्च विशेष महत्त्वमस्ति।

## निरुक्तकालः

निघण्टुकालानन्तरं निरुक्तानां समयः प्रारम्भो भवति । दुर्गाचार्यानुसारेण निरुक्तं चतुर्दशसङ्ख्यकमासीत् । (निरुक्तं चतुर्दशप्रभेदम् दुर्गवृ० १।१३) । यास्कस्योपलब्ध-निरुक्ते द्वादश निरुक्तकतृणां नामानि मतानि च निर्दिष्टानि सन्ति। एतेषां नामाक्षरक्रमेणैवमस्ति- १. अग्रायणः, २. औपमन्यवः, ३. औदुम्बरायणः, ४. और्णवाभः, ५. काथक्यः, ६. क्रौष्टुकिः, ७. गार्ग्यः, ८. मालवः, ९. तैटिकिः, १०. वार्ष्यायणिः, ११. शाकपूणिः, १२. स्थौलाष्ठिविश्च। त्रयोदशस्तु स्वयं यास्क एवास्ति । एतेषां त्रयोदशतमानामाचार्याणामतिरिक्तः कोऽस्ति चतुर्दश आचार्यः ? इति त्वज्ञात एवास्ति। एतेषु ग्रन्थकारेषु शाकपूणेर्मतमाधिक्येनोद्धृतमस्ति। बृहद्देवतायामपि अस्य मतस्योल्लेखो मिलति । बृहद्देवतायां तथा पुराणेषु च शाकपूणेः 'रथीतरशाकपूणि' नाम्ना स्मृतोऽस्ति।

## यास्कस्य निरुक्तम्

निरुक्तं वेदानां षडङ्गेषु अन्यतममस्ति। सम्प्रति यास्करचितनिरुक्तमेवास्य वेदाङ्गस्य प्रतिनिधिग्रन्थोऽस्ति । अस्मिन् निरुक्ते द्वादशाध्यायाः सन्ति । अन्ते द्वावध्यायौ परिशिष्टरूपेण स्तः । अनेन प्रकारेण समग्रग्रन्थोऽयं चतुर्दशाऽध्यायेषु विभक्तोऽस्ति । परिशिष्टभागमप्यर्वाचीनमिति वक्तुं न शक्यते । यतो यास्क इव उव्वटोऽपि परिशिष्टभागात्परिचित आसीत्। उव्वट: स्वकीये यजुर्वेदभाष्ये (१८७७), निरुक्ते ( १३।१३ ) समुपलब्धं वाक्यं निर्दिष्टमकरोत् । अतोऽस्यांशस्य भोजराजात्प्राचीनत्वं स्वतः सिद्धमस्ति । यास्ककृतं निरुक्तन्तु निघण्टुग्रन्थस्य व्याख्याऽस्ति। अतोऽस्य वेदाङ्गत्वमनुपपन्नमित्याशङ्क्य समाधत्ते – 'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तनिरुक्तम् ।' अन्यच्च 'एकैकस्य पदस्य सम्भाविता अवयवार्था यत्र निःशेषेण उच्यन्ते तदपि निरुक्तम्। अतोऽस्य वेदाङ्गत्वं सिद्धम्।

यास्कस्य प्राचीनतायां नाऽत्र लेशतोऽपि सन्देहस्यावकाशः । पाणिनेरपि प्राचीनतरोऽयमस्ति । संस्कृतभाषाया यो विकासो यास्कस्य निरुक्ते मिलति तत्पाणिनेरष्टाध्याय्यां व्याख्यातरूपतः प्राचीनतरमस्ति। महाभारतस्य मोक्षपर्वानुसारेण निघण्टोः कर्ता यास्को नाऽऽसीत्। अस्य रचयिता कोऽपि प्रजापतिः काश्यप आसीत्

वृषो हि भगवान् धर्मः ख्यातो लोकेषु भारत।

निघण्टकपदाख्याने विद्धि मां वृषमुत्तमम्॥

कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते।

तस्माद् वृषाकपि प्राह कश्यपो मां प्रजापतिः॥ (महा० मो० प० अ० ३४२, श्लो० ८६-८७ )

तत्रैव निघण्टोर्व्याख्याता यास्कः आसीत्, इत्यस्य प्रमाणमपि , लब्धमस्ति-

लिपिविष्टेति चाख्यायां होनरोमा च योऽभवत्।

तेनाविष्टं तु यत्किञ्चित् शिपिविष्टेति च स्मृतः ॥

यास्को मामृषिरव्यग्रोऽनेकयज्ञेषु गीतवान्।

शिपिविष्ट इति ह्यस्माद् गुह्यनाम परोह्यहम्॥

स्तुत्वा मां शिपिविष्टेति यास्कः ऋषिरुदारधीः।

मत्प्रसादादधोनष्टं निरुक्तमधिजग्मिवान्॥ (म० भा० शा० ५० श्लो० ६९-७१ )

इत्यादिना प्रमाणितस्य यास्कस्य कः काल इति विचारे प्रस्तुते—(क) महाभारतस्योपरिलिखितपद्यद्वयस्योद्धरणात् ततोऽर्वाचीनो महाभारतः, (ख) पाणिनिः स्वकीये 'वासूदेवार्जुनाभ्यां वन' ४।३।९८ इत्यस्मिन् सूत्रे 'कृष्णार्जुनौ' स्मृतवानिति

ततोऽयं प्राचीनः । पाणिनिः पाण्डुपुत्रादर्जुनात्परवर्ती सिद्धो भवति । पाण्डुपुत्राणां समयस्तु राजतरङ्गिण्याम्

'शतेषु षट्सु साऽर्धेषु व्यधिकेषु च भूतले ।

कलेगतेषु वर्षाणामभवन् कुरुपाण्डवाः ॥

इदं सर्वं विचार्य खीष्टपूर्वनवमशतकस्य पूर्वार्द्ध यास्करजायतेति प्रतीयते । यास्कस्यास्य ग्रन्थस्य महत्ताऽत्यधिकाऽस्ति । ग्रन्थस्यारम्भे यास्को निरुक्तस्य सिद्धान्तस्य वैज्ञानिकं प्रदर्शनमकरोत् । वेदार्थानुशीलनाय तदाऽनेकपक्षा आसन् । येषां नामानि अनेन प्रकारेण प्रदत्तानि सन्ति-(१) अधिदैवतः, (२) अध्यात्मः, ( ३ ) आख्यातसमयः ( ४ ) ऐतिहासिकाः, (५) नैदानाः, (६) नैरुक्ताः, (७) परिव्राजकाः, (८) याज्ञिकाश्च ।

अनेन मतनिर्देशेन वेदार्थानुशीलनस्येतिहासोपरि विशिष्टरूपेण प्रकाशः प्रसरति । यास्कस्य प्रभावः अवान्तरकालिकभाष्योपरि अस्ति । सायणस्तु अस्याः पद्धत्या अनुसरणं कृत्वा वेदभाष्यरचनायां कृतकार्योऽभवत् । यास्कस्य प्रक्रियाऽऽधुनिकभाषावेत्तृणां प्रधानतो मान्याऽस्ति । निरुक्तस्यैकमात्रप्रतिनिधित्वेन निरुक्तग्रन्थस्य सर्वातिशायि महत्त्वमस्ति ।

निरुक्तं तु स्वयं भाष्यरूपमेवास्ति । तथाऽपि यत्र तत्रतादृशं दुरूहमस्ति यत्तस्य अर्थावबोधने विद्वान् टीकाकारोऽपि काठिन्यमनुभवति । निरुक्तं व्याख्यातुं विक्रमाब्दात् पूर्वमेव विदुषां ध्यानाऽकृष्टोऽभवत् । अस्य साक्षी पतञ्जलेमहाभाष्यमस्ति । 'शब्दग्रन्थेषु चैषा प्रभूततरागतिर्भवति । निरुक्तं व्याख्यायते । न कश्चिदाह पाटलिपुत्र व्याख्यायत इति । किञ्च पतञ्जले: सङ्केतः कस्यां दिशि वर्तते ? इति तु ज्ञातुं न कोऽपि कथयति ।

# निरुक्तस्य टीकाकाराः

## (१) दुर्गाचार्यः

निरुक्तस्य प्राचीनोपलब्धष्टीकाकारो दुर्गाचार्य एवास्ति । किञ्चायं नाद्यष्टीकाकारोऽस्ति । स्वकीयां दुर्गवृत्त्यामयं प्राचीनटीकाकर्तृणामुल्लेखं कृतवान् । अस्यामेव वृत्त्यां चतुर्षु स्थलेषु अनेन कस्यापि वार्त्तिककृतोल्लेखः कृतः (निरुक्तवृत्तिः १।१, ६।११, ८१४१, ११।१३)। स्कन्दस्वामी अप्यस्य पूर्वटीकाकारस्योल्लेखं कृतवान् । 'तस्य पूर्वटीकाकारैर्ववर्रस्वामिभगवद्दुर्गप्रभृतिभिर्भावस्तरेण व्याख्यातस्य ।' अस्यां वृत्त्यां निरुक्तस्य तथा तस्मिन्नुल्लिखितमन्त्राणां सविस्तरेण व्याख्यामकरोत् । अत्र निरुक्तस्य प्रतिशब्दः समुद्धतोऽस्ति । निरुक्तं वस्तुतः स्वयमेव भाष्यं मूलतः, परं नितान्तदुरूहत्वात् टीकाकारास्तदर्थावगमनाय कठोरतरं श्रमं कृतवन्तः । दुर्गाचार्येण अस्मिन् विषये कथितम्-'ईदृशेषु शब्दार्थन्यायसङ्कटेषु मन्त्रार्थघटनेषु दुरवबोधेषु मतिमतां मतयो न प्रतिहन्यन्ते, वयं त्वेतावदत्रावबुद्धयामह इति' (७१३१)। क्वचित् क्वचिदनेन स्वयमभिनवपाठस्य योजनाऽपि कृतेति । यद्यस्माकमियं वृत्तिः समुपलब्धा न भवेत् तदा निरुक्तस्यावबोधनं दुरूहो व्यापारोऽभवत् किञ्च दुर्गाचार्यस्य विषयेऽस्माकमैतिहासिकं ज्ञानमतिस्वल्पमस्ति । ४।१४

निरुक्तेऽयं स्वं कापिष्ठलशाखाध्यायी वसिष्ठगोत्रीयो ब्राह्मणमलिखत् । प्रत्येकस्याऽध्यायस्यान्तिमायां पुषिकायामनेन प्रकारेण लिखितमस्ति-'इति जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ ऋज्वायां निरुक्तवृत्तौ-अध्यायः समाप्तः । अनेन ज्ञातो भवति यदयं जम्बूमार्गाश्रमस्य निवासी आसीत् । किञ्च स्थानमिदं कुत्रास्तीति कोऽपि न जानाति । डा० लक्ष्मणस्वरूपमहोदयस्त्वेनं काश्मीर-राज्यस्य प्रसिद्ध नगरं 'जम्बू' मन्यते । किञ्च भगवद्दत्तमहोदयस्येदमनुमानमस्ति यदयं दुर्गाचार्यो गुर्जरप्रान्तस्य निवासी आसीत् । यतोऽनेन मैत्रायणीसंहितायाः स्वव्याख्यायामुद्धरणानि

प्रदत्तानि । प्राचीनकाले संहितेयं गुर्जरप्रान्ते एव विशेषरूपेण प्रसिद्धा आसीत् । ईदृशमनुमानेऽयमेवाधारोऽस्ति।

अद्यापि यथार्थरीत्या दुर्गाचार्यस्य समयनिरूपणं नाभूत् । अस्या वृत्याः प्राचीना हस्तलिखिता वृत्ति: १४४४ विक्रमाब्दस्यास्ति । अतो दुर्गाचार्यः अस्मात् कालात्प्राचीनतरोऽस्ति । ऋग्वेदस्य भाष्यकार उद्गीथो दुर्गाचार्यस्य वृत्त्या परिचित आसीत् । आचार्य-उद्गीथस्य समयः विक्रमाब्दस्य सप्तमशतकमस्ति । अता दुर्गाचार्यमपि सप्तमशतकाद् अर्वाचीनं कथितुं न शक्यते। निरुक्तप्रतिपादिता विषया अधःस्थितेन श्लोकेनोपस्थाप्यन्ते

'वर्णागमो वर्णविपर्यस्य द्वौ चापरौ वर्णविकारनाशौ।

धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्॥'

## (२) स्कन्दमहेश्वरः

निरुक्तस्यापरासु टीकासु महेश्वरस्य टीका लाहौरनगरीतः प्रकाशिताऽभवत्। टीकेयं प्राचीना पाण्डित्यपूर्णा चाऽस्ति। अयं सैव स्कन्दस्वामी वर्त्तते यो हि ऋग्वेदस्य भाष्यं लिलेख। अयं गुर्जरस्य प्रख्यातस्य 'बलभी-नगरस्य निवासी आसीत्। अस्य पितुर्नाम भर्तध्रुव आसीत्। अस्य समयस्तु विक्रमाब्दस्य सप्तमशतकस्योत्तरार्द्धमस्ति। अस्य ऋग्वेदस्य भाष्यं प्रामाणिकञ्चास्ति। अल्पाक्षरत्वेनापि सारगभितमासीत्। एवं विधेन विशिष्टविदुषा विरचितत्वेनेयमपि टीका स्वकीयां विशिष्टतां स्थापयति।

## (३) निरुक्तनिचयः

निरुक्तनिचयस्य रचयिता कोऽपि वररुचि आसीत्। इयं नास्ति निरुक्तस्य साक्षाद् व्याख्या, अपितु निरुक्तसिद्धान्तस्य प्रतिपादकानां शताधिकानां श्लोकानां स्वतन्त्रा व्याख्याऽस्ति । निरुक्तस्यासां टीकानामनुशीलनेन भाषाशास्त्रीयज्ञातव्य विषयस्य वयं ज्ञानं प्राप्नुमः । निरुक्ते तथा तस्य वृत्त्यां प्रदत्तसङ्केतं गृहीत्वैव

मध्यकालिका विद्वांसो वेदभाष्यरचनायां साफल्यमाप्नुवन्। मध्यकालिकभाष्यकर्त्तारो विद्वांसः स्वसिद्धान्तनिर्माणे एभिर्ग्रन्थैरेव प्रेरणामलभन्त । नाऽत्र लेशतोऽपि सन्देहस्यावकाशः । एतेषां ग्रन्थानामैतिहासिकमहत्त्वं वेदस्यार्थानुचिन्तनस्य विषये विशिष्टमस्ति । अस्य ग्रन्थस्योद्धरणं प्रतिष्ठितैराचार्यः कृतमतोऽस्य प्रियता प्रमातुं शक्यते।

## निरुक्तस्य महत्त्वम्

निरुक्तशब्दस्य व्याख्या सायणाचार्यानुसारेण - 'अर्थावबोधे निरपेक्षतया पदजातं यत्र तन्निरुक्तम् ।' अस्मिन् प्रसङ्गे दुर्गाचार्यस्य कथनमिदमस्ति 'प्रधानं चेदमितरेभ्योऽङ्गेभ्यश्च अर्थपरिज्ञानाभिनिवेशात्। अर्थो हि प्रधानः तद्गुणः शब्दः, स च इतरेषु व्याकरणादिषु चिन्त्यते। यथा शब्दलक्षणपरिज्ञानं सर्वशास्त्रेषु व्याकरणाद् एवं शब्दार्थनिबन्धनपरिज्ञानं निरुक्तात्।(दुर्गाचार्यवृत्तिः , पृ० ३)

निरुक्ते वैदिकशब्दानां निरुक्तिरस्ति। निरुक्तिशब्दस्यार्थो भवति व्युत्पत्तिः। निरुक्तस्य सर्वमान्य मतमिदमस्ति यत्प्रत्येकः शब्दः केनाऽपि धातुना सहावश्यमेव सम्बद्धो भवति । अतो निरुक्तकारः शब्दानां व्युत्पत्ति प्रदर्शयन्, धातुना सह विभिन्नप्रत्ययानां निर्देशमपि दर्शयति। निरुक्तानुसारेण सर्वे शब्दा व्युत्पन्ना भवन्ति। वैयाकरण-शाकटायनस्याऽपीदमेव मतमासीत्। अस्योल्लेखो यास्केन पतञ्जलिना च स्व-स्वग्रन्थे कृतोऽस्ति।

- 'तत्र नाना आख्यातजानीति शाकटायनो निरुक्तसमयश्च ।' (निरु० १।१।२।२।)

'नाम च धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम्। (महा.)

शब्दानां व्युत्पत्तिर्बहुविधाऽस्ति । दुहिताशब्दस्य व्युत्पत्त्या विषये यास्को विदति- 'दुहिता दुहिता। दूरे हिता। दोग्धेर्वा।' अर्थाद् दूरे विवाहिता दुहिता एव हितकरा

भवति अथवा यत्र प्रदत्ता तत्रैवाहितकरा भवति, अथवा दोग्धः अथवा सा हि नित्यमेव पितुः सकाशाद् द्रव्यं दोग्धि।

निरुक्तं यस्मिन्नाधारे प्रवृत्तं भवति–अर्थात् प्रत्येकं संज्ञापदं धातुना व्युत्पन्नोऽभवत्, इत्याधारस्तु नितान्तं वैज्ञानिकमस्ति । अस्यैव सम्प्रति नामास्ति 'भाषाविज्ञानम्' । अस्योन्नतिः पाश्चात्यजगति शतवर्षाभ्यन्तरे एवाऽभवत् । सोऽपि संस्कृतभाषाया प्रचारो यदा तत्राऽभवत् तदैवेति। किञ्चाद्यतः त्रिसहस्रवर्षं प्राग् वैदिका ऋषयः अस्य शास्त्रस्य सिद्धान्तानां वैज्ञानिकरीत्या निरूपणं कृतवन्तः । भाषाशास्त्रस्येतिहासे भारतवर्ष एवास्य मूलोद्गमस्थानमस्ति। नात्र लेशतोऽपि सन्देहः। निरुक्तस्यारम्भेऽस्य विषयस्य येषां नियमानां प्रतिपादनं समुपलब्धं भवति तत्तु विशेषरूपेण महनीयमस्ति।

## निरुक्तस्य प्रतिपादनशैली

निरुक्तं भाषाशास्त्रदृष्टया एकमनुपमं रत्नमस्ति । निरुक्तस्य मान्यः सिद्धान्तोऽस्ति यन्निरुक्ते नाम धातुजमस्ति। वैयाकरणेषु शाकटायनस्यैवेदं मतमासीत्- 'सर्वधातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम् । अस्य मतस्य समीक्षा युक्तिपूर्वकेण केनाऽपि गार्ग्याचार्येण कृताऽऽसीत्, यस्य खण्डनं प्रबलतराभिर्युक्तिभिः कृतं यास्केनेति । भाषायाः मूलं धातुरेव भवति, अस्य तथ्यस्योद्घाटनं यास्केन सहस्रत्रयवर्षं पूर्वमेव कृतम् । तथ्यमिदमाधुनिकभाषाविज्ञानस्य मेरुदण्ड एवास्ति । यास्कः स्वस्य वैज्ञानिकमतस्य प्रस्थापनं युक्तिपूर्वकं कृतवानस्ति।

गार्ग्यस्य प्रथमाऽऽपत्तिरसङ्गताऽस्ति । कस्याऽपि वस्तुनः क्रियानुसारेण नामकरणेनानेकानां वस्तुनामेकक्रियात्वेनानेकानामेकनाम भवितुं शक्यते । तुल्यकर्मकर्तेषु जनेष्वपि तेनैव कर्मणा व्यक्तिविशेषस्य श्रेणीविशेषस्य वा नाम भवति न तु सर्वेषाम्। लोकव्यवहारस्येयमेव शैली अस्ति। तक्ष्णः=कर्मकस्य, एवं परिव्रजनम् - परितः भ्रमणम्, इत्यादि क्रिया बहुभिर्जनैः सम्पादिता भवति, तथापि 'तक्षा'-पदेन कर्मकारस्यैव बोधो भवति एवञ्च परिव्राजकपदेन संन्यासिना बोधो भवति। कस्यापि

शब्दस्य स्वभाव एक एवास्ति यत् कयाऽपि क्रियया कस्याप्येकस्यैव वस्तुनो बोधो भवति नान्यस्य। एकेन वस्तुना सह बहूनां क्रियाणां योगे सत्यपि एकैव क्रियानुसारेण तस्य नाम भवति।

शब्दस्यायं स्वभावः तथा लोकप्रसिद्धव्यवहारोऽप्यस्ति । 'तक्षा' एवं परिव्राजकः अन्यापि क्रियायाः सम्पादनं करोति, किञ्च क्रियाया वैशिष्ट्येन तक्षण-परिव्रजनक्रियाऽनुसारेण तयोर्नामिकरणमभूत् । निष्पनेन नाम्नैव कस्यापि वस्तुनः क्रियायाः परीक्षणं नासङगतं भवति। यतो नाम्नः निष्पन्ने सति तस्य योगार्थस्य परीक्षणं भवितुं शक्यते ('भवति हि निष्पन्नेऽभिव्यवहारे योगपरीष्टिः-'निरु०११) । नाम्नो निष्पन्नत्वाभावे कस्य परीक्षणं भविष्यति ? 'प्रथनात् पृथिवी' विस्तृतत्वेनेदं नाम पृथिव्या भवति । शाकटायनस्यास्यां व्याख्यायां गार्ग्यस्येदं कथनं नितान्तमयुक्तिकरमस्ति यदियं केन विस्तारिता? तर्कहीनमिदं कथनमस्ति. यतः पृथिव्याः पृथुत्वं प्रत्यक्षदृष्टमस्ति। अस्याः कथनस्य विषये प्रश्न एव निरर्थकोऽस्ति। अतो गार्ग्यस्येयमप्यापत्तिरसङ्गतैवास्ति।

शाकटायनेन पदानां निरुक्त्यै एकस्याभिन्नपदस्य व्याख्याऽनेकेषां धातूनां योगेन निष्पादिता। सत्य-शब्दः शाकटायनेन भागद्वये विभाजितः, यथा सत् + य = सत्यम्, यस्मिन् प्रथमांशः 'अस्ति'-शब्दानिष्पन्नो भवति तथा द्वितीयांश. 'इण्'-धातोः 'आयाति'- शब्दात् निष्पन्नोऽस्ति। 'सन्तमेव अर्थम् आयाति गमयतीति सत्यम् ।' अर्थाद् यो विद्यमानार्थस्य ( यथार्थस्य ) ज्ञानं कारयति तत् सत्यम् । अस्योपरि गार्ग्यस्यापत्तिरस्ति महती । यास्कस्य प्रतिवचनमस्तिशब्दान् स्वपक्षप्रतिपादनं विद्यासम्पादयन्नपि शाकटायनस्य निरुक्तिरनुगतार्थाऽस्ति, अतो नामान्योऽस्ति । अनन्वितार्थे शब्दस्य संस्कर्त्ता पुरुषो निन्दनीयो भवति, शास्त्रगर्हा तु नास्त्येव –'सैषा पुरुषगर्हा न शास्त्रगर्हा' निरुक्त्याः पदस्य चान्वयो न्याय्योऽस्ति। तदर्थं पदविभाजनं नानुचितमस्ति । ब्राह्मणग्रन्थेषु निरुक्तिक्रमोऽयं ग्राह्योऽस्ति, न गर्हणीयः । शतपथब्राह्मणम् (१४।८।४१) हृदयशब्दं भागत्रयेषु विभज्य तस्य निरुक्तिः हृ, दा, इण् (आययति रूपात् ) धातोनिष्पन्नमकरोत्। फलतः शाकटायनस्य मतं यथार्थमस्ति।

परभाविन्या क्रियया पूर्वजातस्य वस्तुनो नामकरणं नोचितमित्यपि गार्ग्यस्यापत्तिरकिञ्चित्करैवास्ति। लोके परभाविन्या क्रियया पूर्वजातस्य वस्तुनः संज्ञा वा व्यपदेशो बहुषु स्थलेषु परिलक्षितो भवति । भविष्यद्योगेन सम्बन्धसाहाय्येन च कस्यापि जनस्य विल्वादः अथवा लम्बचूडको नामकरणं लोके भवति । मीमांसादर्शनस्याप्ययमेव सिद्धान्तोऽस्ति। रूढशब्दानामपि व्युत्पत्तिरनावश्यकैवास्ति । इदं कथनमपि नोचितमस्ति । वेदे रूढशब्दानां व्युत्पत्तिरनेकत्र दृग्गोचरा भवति - 'यदसर्पत तत् सर्पिः'। सर्पिषो व्युत्पत्तिर्गमनार्थकस्य सृपधातोनिष्पन्नो भवति । अनेन प्रकारेण यास्केन युक्तिव्यूहैः स्पष्टतः प्रतिपादितस्य समस्तं नाम धातुजं भवति तथा वर्तमानभाषाशास्त्रस्यायमेव मान्यः सिद्धान्तः अस्ति (निरु० १।१४)।

# श्रीयास्कमुनिविरचितं निरुक्तं

## अथ प्रथमोऽध्यायः

### प्रथमः पादः

समाम्नायः समाम्नातः । स व्याख्यातव्यः । तमिमं समाम्नायं निघण्टव इत्याचक्षते। निघण्टवः कस्मात्। निगमा इमे भवन्ति। छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः। ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्ते इत्यौपमन्यवः। अपि वा आहननादेव स्युः। समाहता भवन्ति। यद्वा समाहृता भवन्ति।

तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति। तत्रैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति। भावप्रधानमाख्यातम्। सत्त्वप्रधानानि नामानि। तद्यत्रोभे भावप्रधाने भवतः पूर्वापरीभूतं भावमाख्यातेनाचष्टे। व्रजति पचतीति । उपक्रमप्रभृत्यपवर्गपर्यन्तं मूर्तं सत्त्वभूतं सत्त्वनामभिः । व्रज्या पक्तिरिति । अद इति

सत्त्वानामुपदेशः । गौरश्वः पुरुषो हस्तीति । भवतीति भावस्य । आस्ते शेते व्रजति तिष्ठतीति । इन्द्रियनित्यं वचनमौदुम्बरायणः ।१.१ ।

तत्र चतुष्ट्वं नोपपद्यते । अयुगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः । शास्त्रकृतो योगश्च । व्याप्तिमत्त्वात्तु शब्दस्याणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके । तेषां मनुष्यवद् देवताभिधानम् । पुरुषविद्यानित्यत्वात् कर्मसंपत्तिर्मन्त्रो वेदे । षड्भावविकारा भवन्तीति वार्ष्यायणिः । जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति । जायत इति पूर्वभावस्यादिमाचष्टे । नापरभावमाचष्टे न प्रतिषेधति । अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणम् । विपरिणमते इत्यप्रच्यवमानस्य तत्त्वाद् विकारम् । वर्धते इति स्वाङ्गाभ्युच्चयम् । सांयौगिकानां वार्थानाम् । वर्धते विजयेनेति वा । वर्धते शरीरेणेति वा । अपक्षीयते इत्येतेनैव व्याख्यातः प्रतिलोमम् । विनश्यतीत्यपरभावस्यादिमाचष्टे । न पूर्वभावमाचष्टे न प्रतिषेधति ।१.२।

अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह । ते यथावचनमभ्यूहितव्याः । ते यथावचनमभ्यूहितव्याः । न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः । नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति । उच्चावचाः पदार्था भवन्तीति गार्ग्यः । तद्य एषु पदार्थः प्राहुरिमे तं नामाख्यातयोरर्थविकरणम् । आ इत्यर्वागर्थे । प्र परा इत्येतस्य प्रातिलोम्यम् । अभि इत्याभिमुख्यम् । प्रति इत्येतस्य प्रातिलोम्यम् । अति सु इत्यभिपूजितार्थे । निर् दुर् इत्येतयोः प्रातिलोम्यम् । नि अव इति विनिग्रहार्थीया । उद् इत्येतयोः प्रातिलोम्यम् । सम् इत्येकीभावम् । वि अप इत्येतस्य प्रातिलोम्यम् । अनु इति सादृश्यापरभावम् । अपि इति संसर्गम् । उप इत्युपजनम् । परि इति सर्वतोभावम् । अधि इत्युपरिभावमैश्वर्यं वा । एवमुच्चावचानर्थान्प्राहुः । त उपेक्षितव्याः ।१.३।

## द्वितीयः पादः

अथ निपाताः उच्चावचेष्वर्थेषु निपतन्ति । अप्युपमार्थे । अपि कर्मोपसंग्रहार्थे । अपि पदपूरणाः । तेषामेते चत्वार उपमार्थे भवन्ति । इवेति भाषायां च । अन्वध्यायं

च । अग्निरिव । इन्द्र इव । इति । नेति प्रतिषेधार्थीयो भाषायाम् । उभयमन्वध्यायम् । नेन्द्रं देवममंसत । इति प्रतिषेधार्थीयः । पुरस्तादुपाचारस्तस्य यत्प्रतिषेधति । दुर्मदासो न सुरायाम् । इत्युपमार्थीयः । उपरिष्टादुपाचारस्तस्य येनोपमिमीते । चिदित्येषोऽनेककर्मा । आचार्यश्चिदिदं ब्रूयात् । इति पूजायाम् । आचार्यः कस्मादाचार्य आचारं ग्राहयति । आचिनोत्यर्थान् । आचिनोति बुद्धिमिति वा । दधिचित् । इत्युपमार्थे । कुल्माषांश्चिदाहर । इत्यवकुत्सिते । कुल्माषाः कुलेषु सीदन्ति। नु इत्येषोऽनेककर्मा । इदं नु करिष्यति । इति हेत्वपदेशे । कथं नु करिष्यति । इत्यनुपृष्टे । नन्वेतदकार्षीत् । इति च । अथाप्युपमार्थे भवति । वृक्षस्य नु ते पुरुहूत वयाः । वृक्षस्येव ते पुरुहूत शाखाः । वयाः शाखा वेतेः । वातायना भवन्ति । शाखाः खशयाः । शक्नोतेर्वा । अथ यस्यागमादर्थपृथक्त्वमह विज्ञायते न त्वौद्देशिकमिव विग्रहेण पृथक्त्वात्स कर्मोपसंग्रहः । चेति समुच्चयार्थ उभाभ्यां संप्रयुज्यते । अहं च त्वं च वृत्रहन् । इति । एतस्मिन्नेवार्थे । देवेभ्यश्च पितृभ्य आ । इत्याकारः । वेति विचारणार्थे । हन्ताहं पृथिवीमिमां न दधानीह वेह वा । इति । अथापि समुच्चयार्थे भवति ।१.४।

वायुर्वा त्वा मनुर्वा त्वा । इति । अह इति च ह इति च विनिग्रहार्थीया । पूर्वेण संप्रयुज्येते । अयमहेदं करोत्वयमिदम् । इदं ह करिष्यतीदं न करिष्यतीति । अथाप्युकार एतस्मिन्नेवार्थ उत्तरेण । मृषेमे वदन्ति सत्यमु ते वदन्तीति । अथापि पदपूरणः । इदमु । तदु । हीत्येषोऽनेककर्मा । इदं हि करिष्यति । इति हेत्वपदेशे । कथं हि करिष्यति । इत्यनुपृष्टे । कथं हि व्याकरिष्यति । इत्यसूयायाम् । किलेति विद्याप्रकर्षे । एवं किलेति । अथापि न ननु इत्येताभ्यां संप्रयुज्यतेऽनुपृष्टे । न किलैवम् । ननु किलैवम् । मेति प्रतिषेधे । मा कार्षीः । मा हार्षीरिति च । खल्विति च । खलु कृत्वा । खलु कृतम् । अथापि पदपूरणः । एवं खलु तद् बभूवेति । शश्वदिति विचिकित्सार्थीयो भाषायाम् । शश्वदेवम् । इत्यनुपृष्टे । एवं शश्वत् । इत्यस्वयं पृष्टे । नूनमिति विचिकित्सार्थीयो भाषायाम् । उभयमन्वध्यायं विचिकित्सार्थीयश्च पदपूरणश्च । अगस्त्य इन्द्राय हविर्निरूप्य मरुद्भ्यः संप्रदित्सांचकार । स इन्द्र एत्य परिदेवयांचक्रे ।१.५।

# तृतीयः पादः

न नूनमस्ति नो श्वः कस्तद्वेद् यदद्भुतम्।

अन्यस्य चित्तमभि संचरेण्यमुताधीतं विनश्यति॥

न नूनमस्त्यद्यतनम्। नो एव श्वस्तनम्। अद्यास्मिन् द्यवि। धुरित्यह्नो नामधेयम्। द्योतत इति सतः। श्व उपाशंसनीयः कालः। ह्यो हीनः कालः। कस्तद्वेद यदद्भुतम्। कस्तद्वेद यदभूतम्। इदमपीतरदद्भुतमभूतमिव। अन्यस्य चित्तम्। अभिसंचरेण्यमभिसंचारि। अन्यो नानेयः। चित्तं चेततेः। उताधीतं विनश्यतीति। अप्याध्यातं विनश्यति आध्यातमभिप्रेतम्। अथापि पदपूरणः।१.६।

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी।

शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः॥

सा ते प्रतिदुग्धां वरं जरित्रे। वरो वरयितव्यो भवति। जरिता गरिता। दक्षिणा मघोनी मघवती। मघमिति धननामधेयम्। मंहतेर्दानकर्मणः। दक्षिणा दक्षतेः समर्धयतिकर्मणः। व्यृद्धं समर्धयतीति। अपि वा प्रदक्षिणागमनात्। दिशमभिप्रेत्य। दिग्घस्तप्रकृतिर्दक्षिणो हस्तः। दक्षतेरुत्साहकर्मणः। दाशतेर्वा स्याद् दानकर्मणः। हस्तो हन्तेः। प्राशुर्हनने। देहि स्तोतृभ्यः कामान्। मास्मानतिदंहीः। मास्मानतिहाय दाः। भगो नोऽस्तु। बृहद्वदेम स्वे वेदने। भगो भजतेः। बृहदिति महतो नामधेयम्। परिवृढं भवति। वीरवन्तः कल्याणवीरा वा। वीरो वीरयत्यमित्रान्। वेतेर्वा स्याद्गतिकर्मणः वीरयतेर्वा। सीमिति परिग्रहार्थीयो वा पदपूरणो वा। प्र सीमादित्यो असृजत्। प्रासृजदिति वा। प्रासृजत् सर्वत इति वा। वि सीमतः सुरुचो वेन आवः। इति च। व्यवृणोत् सर्वत आदित्यः। सुरुच आदित्यरश्मयः। सुरोचनात्। अपि वा सीमेत्येतदनर्थकमुपबन्धमाददीत पंचमीकर्माणम्। सीम्नः सीमतः सीमातो मर्यादातः। सीमा मर्यादा। विषीव्यति देशाविति। त्व इति विनिग्रहार्थीयम्। सर्वनामानुदात्तम्। अर्धनामेत्येके।१.७।

ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्वरीषु ।

ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ॥

इत्यृत्विक्कर्मणां विनियोगमाचष्टे । ऋचामेकः पोषमास्ते पुपुष्वान् । होता । ऋगर्चनी । गायत्रमेको गायति शक्वरीषु । उद्गाता । गायत्रं गायतेः स्तुतिकर्मणः । शक्वर्य ऋचः । शक्नोतेः । तद् यदाभिर्वृत्रमशकद्धन्तुं तच्छक्वरीणां शक्वरीत्वम् । इति विज्ञायते ।

ब्रह्मैको जाते जाते विद्यां वदति । ब्रह्मा । सर्वविद्यः । सर्वं वेदितुमर्हति । ब्रह्मा परिवृवृढः श्रुततः । ब्रह्म परिवृढं सर्वतः । यज्ञस्य मात्रां विमिमीते एकः । अध्वर्युः । अध्वर्युरध्वरयुः । अध्वरं युनक्ति । अध्वरस्य नेता । अध्वरं कामयत इति वा । अपि वाधीयाने युरुपबन्धः । अध्वर इति यज्ञनाम । ध्वरतिर्हिंसाकर्मा । तत्प्रतिषेधः । निपात इत्येके । तत्कथमनुदात्तप्रकृति नाम स्यात् । दृष्टव्ययं तु भवति ।

उत त्वं सख्ये स्थिरपीतमाहुः । इति द्वितीयायाम् । उतो त्वस्मै तन्वं विसस्रे । इति चतुर्थ्याम् । अथापि प्रथमाबहुवचने ।१.८।

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ।

आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे ॥

अक्षिमन्तः कर्णवन्तः सखायः । अक्षि चष्टेः । अनक्तेरित्याग्रायणः । तस्मादेते व्यक्ततरे इव भवतः  इति ह विज्ञायते । कर्णः कृन्ततेः । निकृत्तद्वारो भवति । ऋच्छतेरित्याग्रायणः । ऋच्छन्तीव खे उदगन्ताम् इति ह विज्ञायते । मनसां प्रजवेष्वसमा बभूवुः । आस्यदघ्ना अपरे । उपकक्षदघ्ना अपरे । आस्यमस्यतेः । आस्यन्दत एनदन्नमिति वा । दघ्नं दघ्यतेः स्रवतिकर्मणः । दस्यतेर्वा स्यात् । विदस्ततरं भवति । प्रस्नेया ह्रदा इवैके ददृशिरे । प्रस्नेया स्नानार्हाः । ह्रदो ह्रादतेः शब्दकर्मणः । ह्लादतेर्वा

स्याच्छीतीभावकर्मणः । अथापि समुच्चयार्थे भवति । पर्याया इव त्वदाश्विनम् । आश्विनं च पर्यायाश्चेति । अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणास्ते मिताक्षरेष्वनर्थकाः । कमीमिद्विति १.९

निष्ट्वक्त्रासश्चिदिन्नरो भूरितोका वृकादिव ।

बिभ्यस्यन्तो ववाशिरे शिशिरं जीवनाय कम् ॥

शिशिरं जीवनाय । शिशिरं शृणातेः शम्नातेर्वा । एमेनं सृजता सुते । आसृजतैनं सुते । तमिद्वर्धन्तु नो गिरः । तं वर्धयन्तु नो गिरः स्तुतयः । गिरो गृणातेः । अयमु ते समतसि । अयं ते समतसि । इवोऽपि दृश्यते । सु विदुरिव । सु विज्ञायेते इव । अथापि नेत्येष इदित्येतेन संप्रयुज्यते परिभये ।१.१०।

हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमा॑न् ।

शचीर्मदन्त उत दक्षिणाभिर्नेज्जिह्मायं॑न्त्यो नरकं पताम ।

इति नरकं न्यरकं नीचैर्गमनम् । नास्मिन् रमणं स्थानमल्पमप्यस्तीति वा । अथापि न चेत्येष इदित्येतेन संप्रयुज्यतेऽनुपृष्टे । न चेत् सुरां पिबन्तीति । सुरा सुनोतेः । एवमुच्चावचेष्वर्थेषु निपतन्ति । त उपेक्षितव्याः १.११

## चतुर्थः पादः

इतीमानि चत्वारि पदजातान्यनुक्रान्तानि । नामाख्याते चोपसर्गनिपाताश्च । तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च । न सर्वाणीति गार्ग्यो वैयाकरणानां चैके । तद् यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन विकारेणान्वितौ स्याताम् ....... संविज्ञातानि तानि यथा गौरश्वः पुरुषो हस्तीति । अथ चेत् सर्वाण्याख्यातजानि नामानि स्युर्यः कश्च तत्कर्म कुर्यात् सर्वं तत् सत्त्वं तथाचक्षीरन् । यः कश्चाध्वानमश्नुवीताश्वः स वचनीयः स्यात् । यत् किञ्चित्तृंद्यात् तृणं तत् । अथापि चेत्

सर्वाण्याख्यातजानि नामानि स्युर्यावद्भिर्भावैः संप्रयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः स्यात्। तत्रैवं स्थूणा दरशया वा आसञ्जनी च स्यात्।१.१२।

अथापि य एषां न्यायवान् कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्। पुरुषं पुरिशय इत्याचक्षीरन्। अष्टेत्यश्वम्। तर्दनमिति तृणम्। अथापि निष्पन्नेऽभिव्याहारेऽभिविचारयन्ति । प्रथनात्पृथिवीत्याहुः । क एनामप्रथयिष्यत् । किमाधारश्चेति । अथानन्वितेऽर्थेऽप्रादेशिके विकारे पदेभ्यः पदेतरार्धान्त्संचस्कार शाकटायनः। एतेः कारितं च यकारादिं चान्तकरणमस्तेः शुद्धं च सकारादिं च । अथापि सत्त्वपूर्वो भाव इत्याहुः । अपरस्माद्भावात् पूर्वस्य प्रदेशो नोपपद्यत इति। तदेतन्नोपपद्यते।१.१३।

यथो हि नु वा एतत् तद् यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन विकारेणान्वितौ स्यातां सर्वं प्रादेशिकमित्येवं सत्यनुपालम्भ एष भवति। यथो एतद् यः कश्च तत्कर्म कुर्यात् सर्वं तत् सत्त्वं तथाचक्षीरन्निति पश्यामः समानकर्मणां नामधेयप्रतिलम्भमेकेषां नैकेषां यथा तक्षा परिव्राजको जीवनो भूमिज इति। एतेनैवोत्तरः प्रत्युक्तः। यथो एतद् यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति सन्त्यल्पप्रयोगाः कृतोऽप्यैकपदिका यथा व्रततिर्दमूना जाट्य आट्णारो जागरूको दर्विहोमीति ॥ यथो एतन्निष्पन्नेऽभिव्याहारेऽभिविचारयन्तीति भवति हि निष्पन्नेऽभिव्याहारे योगपरीष्टिः। प्रथनात्पृथिवीत्याहुः । क एनामप्रथयिष्यत् किमाधारश्चेति । अथ वै दर्शनेन पृथुः । अप्रथिता चेदप्यन्यैः। अथाप्येवं सर्व एव दृष्टप्रवादा उपालभ्यन्ते। यथो एतत्पदेभ्यः पदेतरार्धान्त्संचस्कारेति योऽनन्वितेऽर्थे संचस्कार स तेन गर्यःत्। सैषा पुरुषगर्हा न शास्त्रगर्हा इति । यथो एतदपरस्माद् भावात्पूर्वस्य प्रदेशो नोपपद्यत इति पश्यामः पूर्वोत्पन्नानां सत्त्वानामपरस्माद्भावान्नामधेयप्रतिलम्भमेकेषां नैकेषां यथा बिल्वादो लम्बचूडक इति। बिल्वं भरणाद्वा भेदनाद्वा।१.१४।

## पञ्चमः पादः

अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते । अर्थमप्रतियतो नात्यन्तं स्वरसंस्कारोद्देशः । तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यम् । स्वार्थसाधकं च । यदि मन्त्रार्थप्रत्ययायानर्थकं भवतीति कौत्सः । अनर्थका हि मन्त्राः । तदेतेनोपेक्षितव्यम् । नियतवाचो युक्तयो नियतानुपूर्व्या भवन्ति । अथापि ब्राह्मणेन रूपसंपन्ना विधीयन्ते । उरु प्रथस्व । इति प्रथयति । प्रोहाणि । इति प्रोहति । अथाप्यनुपपन्नार्था भवन्ति ।

ओषधे त्रायस्वैनम् । स्वधिते मैनं हिंसीः । इत्याह हिंसन् । अथापि विप्रतिषिद्धार्था भवन्ति । एक एव रुद्रोऽवतस्थे न द्वितीयः । असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् । अशत्रुरिन्द्र जज्ञिषे । शतं सेना अजयत् साकमिन्द्रः । इति । अथापि जानन्तं संप्रेष्यति । अग्नये समिध्यमानायानुब्रूहि । इति । अथाप्याहादितिः सर्वमिति । अदितिर्द्यौरदितिरन्तरिक्षम् । इति । तदुपरिष्टाद् व्याख्यास्यामः । अथाप्यविस्पष्टार्था भवन्ति । अम्यक् । यादृश्मिन् । जारयायि । काणुका । इति । १.१५।

अर्थवन्तः शब्दसामान्यात् । एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिवदति । इति च ब्राह्मणम् । क्रीळन्तौ पुत्रैर्नप्तृभिः । इति । यथो एतन्नियतवाचो युक्तयो नियतानुपूर्व्या भवन्तीति लौकिकेष्वप्येतत् । यथा । इन्द्राग्नी । पितापुत्रौ । इति । यथो एतद् ब्राह्मणेन रूपसंपन्ना विधीयन्त इत्युदितानुवादः स भवति । यथो एतदनुपपन्नार्था भवन्तीत्याम्नायवचनादहिंसा प्रतीयेत । यथो एतद् विप्रतिषिद्धार्था भवन्तीति लौकिकेष्वप्येतत् । यथा । असपत्नोऽयं ब्राह्मणः । अनमित्रो राजा । इति । यथो एतज्जानन्तं संप्रेष्यतीति जानन्तमभिवादयते । जानते मधुपर्कं प्राह इति । यथो एतददितिः सर्वमिति लौकिकेष्वप्येतत् । यथा । सर्वरसा अनुप्राप्ताः पानीयम् । इति । यथो एतदविस्पष्टार्था भवन्तीति नैष स्थाणोरपराधो यदेनमन्धो न पश्यति । पुरुषापराधः स भवति । यथा जानपदीषु विद्यातः पुरुषविशेषो भवति पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति ।१.१६।

## षष्ठः पादः

अथापीदमन्तरेण पदविभागो न विद्यते । अवसाय पद्वते रुद्र मृळ । इति । पद्वदवसं गावः पथ्यदनम् । अवतर्गत्यर्थस्यासो नामकरणः । तस्मान्नावगृह्णन्ति । अवसायाश्वान् । इति । स्यतिरुपसृष्टो विमोचने । तस्मादवगृह्णन्ति । दूतो निर्ऋत्या इदमा जगाम । इति । पंचम्यर्थप्रेक्षा वा । षष्ठ्यर्थप्रेक्षा वा । आःकारान्तम् । परो निर्ऋत्या आ चक्ष्व । इति । चतुर्थ्यर्थप्रेक्षा । ऐकारान्तम् । परः सन्निकर्षः संहिता । पदप्रकृतिः संहिता । पदप्रकृतीनि सर्वचरणानां पार्षदानि । अथापि याज्ञे दैवतेन बहवः प्रदेशा भवन्ति । तदेतेनोपेक्षितव्यम् । ते चेद् ब्रूयुर्लिङ्गज्ञा अत्र स्म इति । इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति । इति । वायुलिङ्गं चेन्द्रलिङ्गं चाग्नेये मन्त्रे । अग्निरिव मन्यो त्विषितः सहस्व । इति । तथाग्निर्मान्यवे मन्त्रे । त्विषितो ज्वलितः । त्विषिरित्यप्यस्य दीप्तिनाम भवति । अथापि ज्ञानप्रशंसा भवति । अज्ञाननिन्दा च ।१.१७।

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।

योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥

यद् गृहीतमविज्ञातं निगदेनैव शब्द्यते ।

अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥

स्थाणुस्तिष्ठतेः । अर्थोऽर्तेः । अरणस्थो वा ।१.१८।

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।

उतो त्वस्मै तन्वं१ वि सस्रे जायेव पत्य उशती सुवासाः ॥

अप्येकः पश्यन्न पश्यति वाचम् । अपि च शृण्वन्न शृणोत्येनाम् । इत्यविद्वांसमाहार्धम् । अप्येकस्मै तन्वं विसस्र इति स्वमात्मानं विवृणुते । ज्ञानं प्रकाशनमर्थस्याह । अनया वाचा । उपमोत्तमया वाचा । जायेव पत्ये कामयमाना

सुवासाः ऋतुकालेषु सुवासाः कल्याणवासाः कामयमानाः । ऋतुकालेषु यथा स एनां पश्यति स शृणोति । इत्यर्थज्ञप्रशंसा । तस्योत्तरा भूयसे निर्वचनाय ।१.१९।

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ।

अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम् ॥

अप्येकं वाक्सख्ये स्थिरपीतमाहू रममाणं विपीतार्थम् । देवसख्ये । रमणीये स्थान इति वा । विज्ञातार्थम् । यं नाप्नुवन्ति वाग्ज्ञेयेषु बलवत्स्वपि । अधेन्वा ह्येष चरति मायया । वाक्प्रतिरूपया । नास्मै कामान्दुग्धे वाग्दोह्यान् देवमनुष्यस्थानेषु यो वाचं श्रुतवान् भवत्यफलामपुष्पामिति । अफलास्मै अपुष्पा वाग्भवतीति वा । किंचित्पुष्पफलेति वा । अर्थं वाचः पुष्पफलमाह । याज्ञदैवते पुष्पफले । देवताध्यात्मे वा । साक्षात्कृतधर्माण ऋषयो बभूवुः । तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्संप्रादुः । उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुः । वेदं च वेदाङ्गानि च । विल्मं भिल्मं भासनमिति वा । एतावन्तः समानकर्माणो धातवः । धातुर्दधातेः । एतावन्त्यस्य सत्त्वस्य नामधेयानि । एतावतामर्थानामिदमभिधानम् । नैघंटुकमिदं देवतानाम् । प्राधान्येनेदमिति । तद् यदन्यदैवते मन्त्रे निपतति नैघंटुकं तत् । अश्वं न त्वा वारवन्तम् । अश्वमिव त्वा वालवन्तम् । वाला दंशवारणार्था भवन्ति । दंशो दशतेः । मृगो न भीमः कुचरो गिरिष्ठाः । मृग इव भीमः कुचरो गिरिष्ठाः । मृगो मार्ष्टेर्गतिकर्मणः । भीमो बिभ्यत्यस्मात् ॥ भीष्मोऽप्येतस्मादेव । कुचर इति चरति कर्म कुत्सितम् । अथ चेद् देवताभिधानम् । क्वायं न चरतीति । गिरिष्ठा गिरिस्थायी । गिरिः पर्वतः । समुद्गीर्णो भवति । पर्ववान् पर्वतः । पर्व पुनः पृणातेः प्रीणातेर्वा । अर्धमासपर्व । देवानस्मिन्प्रीणन्तीति । तत् प्रकृतीतरत्सन्धिसामान्यात् । मेघस्थायि । मेघोऽपि गिरिरेतस्मादेव । तद् यानि नामानि प्राधान्यस्तुतीनां देवतानां तद् दैवतमित्याचक्षते । तदुपरिष्टाद् व्याख्यास्यामः । नैघण्टुकानि नैगमानीहेह ।१.२०।

♣♣♣♣♣♣♣♣♣♣♣♣♣♣

Here ends the text and few notes on the Nirukta are given below.

## चत्वारि पदजातानि ।

यास्ककृते निरुक्ते वैदिकपदानां निश्शेषेण अर्थकथनं विषयः। तत्र आचार्यः प्रथमं तावत् पदानि एवं विभजते- तत्र चत्वारि पदजातानि नामाख्याते च उपसर्गनिपाताश्च इति । अर्थात पदानि तावत् नाम, आख्यातम्, उपसर्ग निपाताश्चेति चतुर्धा । तेषु भावप्रधानम् आख्यातम् भवति । सत्वप्रधानानि नामानि । नामाख्यातयोस्तु भावस्यैव प्राधान्यम् । आख्यातं नाम उपक्रमप्रभृति अपवर्गपर्यन्तं पूर्वापरीभूतं भावमाचष्टे । यथा भवति इति । तत्र क्रियाविशेषास्तावत् आस्ते, शेते, व्रजति, गच्छति इत्यादीनि । एवं अदः इति सामान्यतः सत्वानाम् उपदेशः । नामविशेषास्तु यथा गौः अश्वः, पुरुषः, हस्ती इति । धातुयोगे अव्ययानि उपसर्गसंज्ञया ज्ञायन्ते यथा प्र पर वि ,उप, इत्यादयः । तेषां च उपसर्गानां नामाख्यातयोः अर्थविकरणम् नाम सामान्यतः अर्थः । एवं निपतनात् निपाताः भवन्ति । ते अपि उच्चावचेषु अर्थेषु प्रयुक्ताः भवन्ति । यथा इव, न, चित्, नु इत्यादयः। निपातानां व्यवहारे नितरां प्राधान्यमस्ति । एवं यास्केन निरुक्तशास्त्रे पदानि चतुर्धा विभक्तानि । कैश्चिदन्यैः आचार्यैः वाचकद्योतकभेदेन पदस्य द्वैविध्यं, एवमन्यैः पूर्वोक्तेभ्यः चतुर्थः कर्मप्रवचनीयमपि गणयित्वा पञ्चधेति पदस्य भेदाः दर्शिताः ।

## शब्दनित्यत्वं समर्थयत ।

यास्कः निरुक्तशास्त्रस्य प्रथमाध्याये प्रथममेव पदानां विभजनं कृतवान् । तत्र औदुम्बरायणो नाम आचार्यः शब्दस्य अनित्यत्वं उक्तवान् । रसनारूपे वागिन्द्रिये निष्पन्नत्वात् शब्दः केवलं द्विक्षणावस्थायी भवतीति स अनित्यः भवति, अत एव अयुगपत् उत्पन्नानां शब्दानां मेलनेन पदविभजनादिकं न युक्तं भवति, अत एव व्याकरणनिरुक्तादिदिशा चतुर्धा पदविभजनमपि न युज्यते इति तस्य मतम् ।

यास्काचार्यस्तु शब्दस्य नित्यत्वं समर्थयति। तस्य मते व्याप्तिमान् भवति शब्दः। वक्तुः मनसि प्रादुर्भूतमाशयं शब्दाख्येन उपाधिना परा पश्यन्ती मध्यमा वैखरी इत्येवं विधया बहिरागम्य श्रोतुः कर्णद्वारा तस्य मनसि प्रविश्य अर्थरूपेण परिणमति इति अतिमहान् व्यापनशीलः भवति शब्दः। पुनश्च अणीयान् भवति शब्देन व्यवहारः। यदि चेष्टादिभिः व्यवहारः तत्र महान् क्लेशः भवति। शब्देन तु व्यवहारो लघुतमो भवति। तदुक्तं यास्केन - अणीयस्त्वात् च शब्देन संज्ञाकरणं व्यवहारार्थं लोके इति।

## षट् भावविकाराः।

यास्ककृते निरुक्ते वैदिकपदानां निश्शेषेण अर्थकथनं विषयः। तत्र आचार्यः प्रथमं तावत् पदानि एवं विभजते- तत्र चत्वारि पदजातानि। नामाख्याते च उपसर्गनिपाताश्च इति। अर्थात् पदानि तावत् नाम, आख्यातम्, उपसर्गाः, निपाताश्चेति चतुर्धा। चतुर्धा विभक्तेषु पदेषु भावप्रधानमाख्यातं इति उक्तं यास्केन। तत्र भावस्य तु षट् विकाराः सम्भवन्तीति वार्ष्यायणि नाम आचार्यः कथयति। ते च विकाराः 1) जायते 2) अस्ति 3) विपरिणमते 4) वर्धते 5) अपक्षीयते 6) विनश्यति इति षट्। एकस्य एव भावस्य सामान्यतः षट् अवस्थाभेदाः एव विकारपदेन उद्दिष्टः। तत्र जायते इति पूर्वाभावस्य आदिमाचष्टे, न अपरभावमाचष्टे न वा प्रतिषेधति। अस्तीति उत्पन्नस्य सत्वस्य अवधारणम्। विपरिणमते इति अप्रच्यवमानस्य तत्वात् विकारम्। वर्धते इति स्वाङ्गाभ्युच्चयं सांयोगिकानां वा अर्थानाम्। अपक्षीयते इति स्वाङ्गापचयं सायोगिकानां वा अर्थानां अपचयमिति विपरीतरीत्या व्याख्यातम्। विनश्यतीति अपरभावस्य आदिमाचष्टे, न पूर्वभावमाचष्टे न वा प्रतिषेधति। एवं षट् भावविकारान् प्रतिपाद्य आचार्यः अन्ते अतोऽन्ये भावविकाराः एतेषामेव विकाराः इति षडेव सामान्यतो भावविकाराः इति समर्थितवान्।

## सादृश्यार्थे प्रयुक्ताः निपाताः।

यास्ककृते निरुक्ते वैदिकपदानां निश्शेषेण अर्थकथनं विषयः। तत्र आचार्यः प्रथमं तावत् पदानि एवं विभजते- तत्र चत्वारि पदजातानि । नामाख्याते च उपसर्गनिपाताश्च इति । अर्थात् पदानि तावत् नाम, आख्यातम्, उपसर्गाः निपाताश्चेति चतुर्धा । पदेषु अन्यतमाः भवन्ति निपाताः । निपतन्तीति निपाताः। अव्ययानि एव निपाताः । निपाताश्च बह्वर्थकाः भवन्ति । तत्र वेदे तावत् उपमार्थीयाः चत्वारो निपाताः सम्भवन्ति । ते च - इव, न, चित्, नु इति । इव इति सादृश्यार्थे लोके वेदे च सामान्यतया प्रयुज्यते । अग्निरिव इन्द्र इव इत्यादि उदाहरणम् । न इति लोके निषेधार्थे प्रयुज्यते । वेदे तु निषाधार्थे सादृश्यार्थे च प्रयुज्यते । प्रतिषेधार्थीयः नशब्दः यत्प्रतिषेधति तस्य पुरस्तात् प्रयोगः यथा- नेन्द्रं देवममंसत इति । उपमार्थीयस्य नशब्दस्य तु येन उपमिमीते तस्य उपरिष्टात् प्रयोगः यथा- दुर्मदासो न सुरायाम् इति । सुरायां पीतायां दुर्मदाः इव इत्यर्थः । चिद् इति निपातोऽपि बह्वर्थकः तस्य सादृश्यार्थे यथा दधिचिदिति उपमार्थे प्रयोगः । दधिचित् इत्यस्य दधितुल्यः इत्यर्थः । एवं नु इति बह्वर्थको निपातोऽपि उपमार्थे प्रयुज्यते यथा- वृक्षस्य नु ते पुरुहूत वयाः इति मन्त्रे नु इति उपमार्थे प्रयुक्तः । वृक्षस्य शाखा इव इन्द्र ते कराः इत्यर्थः । एवं निपातेषु बह्वर्थकेषु उपमार्थे इव, न, चित्, नु इत्येते निपाताः प्रयुज्यन्ते ।

## निरुक्तप्रयोजनानि ।

यास्काचार्येण निरुक्तस्य प्रथमाध्याये निरुक्ताध्ययनस्य प्रयोजनानि च निर्दिष्टानि । तस्य मते सामान्यतः चत्वारि प्रयोजनानि सन्ति । तानि च – 1) अथापीदमन्तरेण मन्त्रेषु अर्थप्रत्ययो न विद्यते. 2) अथापीदमन्तरेण पदविभागो न विद्यते, 3) अथापि याज्ञे दैवतेन बहवः प्रदशा भवन्ति, 4) अथापि ज्ञानप्रशंसा भवति अज्ञाननिन्दा च । एकैकमधिकृत्य किञ्चिद् विचार्यते ।

## 1. अर्थप्रत्ययः।

निरुक्तशास्त्राध्ययनं विना मन्त्राणामर्थप्रत्ययः न सम्भवति । यदि अर्थो न सम्यक् विज्ञातः तर्हि न अत्यन्तं स्वरसंस्कारोद्देशः । तस्मात् इदं निरुक्तं व्याकरणशास्त्रस्य पूरकं अर्थदर्शनेन स्वयमेव सार्थकं च भवतीति प्रथम प्रयाजनम् । यद्यपि कौत्सादिभिराचार्यैः मन्त्राणामपि केवलं शब्दवृत्तित्वं अर्थराहित्यं च संसूचितं तत्सर्वं यास्केन निरस्तम् । अतः मन्त्राणामर्थप्रत्ययाय निरुक्तशास्त्रं अध्येतव्यम् ।

## 2. पदविभागविज्ञानम् ।

निरुक्तशास्त्रमन्तरा पदविभागज्ञानमपि सम्यक् न विद्यते । यथा अवसाय पद्वते रुद्र मृळ इत्यत्र अवसाय इति चतुर्थ्यन्तं नामपदं पद्वते इत्यस्य विशेषण, गवे इत्यर्थश्च । एवं अवसायाश्वानि इत्यत्र अवसाय इति विमोचनार्थे अव इति उपसर्गपूर्वस्य स्यतिधातोः ल्यबन्ते रूपम् । एवं निर्ऋत्या इति पदस्यापि षष्ठी, पञ्चमा वा अर्थमजानतो व्यक्ततया वक्तुं न शक्यते, तस्मात् निरुक्तमध्येतव्यमिति भावः।

## 3. देवतापरिज्ञानम् ।

यज्ञकर्मणि मीमांसकाः बहून् प्रादेशिकान् संस्कारान् विकारान् , लिङ्गेन स्वीकुर्वन्ति । अत्रापि देवताज्ञानाय निरुक्तं बहु उपकरोति । यथा इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति इत्यत्र वायुलिङ्गं इन्द्रलिङ्गं च आग्नेये मन्त्रे । एवमन्यत्रापि ।

## 4. ज्ञानप्रशंसा अज्ञाननिन्दा च ।

निरुक्ताध्ययनेन ज्ञानस्य प्रशंसा अज्ञाननिन्दा च निर्दिष्टा । यथा यः वेदं कण्ठतः पठित्वा अर्थं न जानाति, स केवलं भारहारः स्थाणुरेव भवति । तस्य शुष्केन्धनवत् अग्निराहित्यात् किञ्चित् न ज्वलति । तदुक्तं यदधीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् । इति । यस्तु अर्थज्ञः स सकलं

भद्रमश्नुते नाकमेति ज्ञानेन विगतपापः सन्। एवं यास्काचार्येण निरुक्तशास्त्रस्य चत्वारि प्रयोजनानि उक्तानि।

## सर्वाणि नामानि आख्यातजानि।

यास्ककृते निरुक्ते चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च इति निर्णीतम्। तदनन्तरं शाकटायनमतेन नैरुक्तिकानां च मतेन सर्वेषां नाम्नां आख्यातजत्वं कथयति। तदुक्तं तत्र नामानि आख्यातजानि इति शाकटायनो नैरुक्तसमयश्च। इति। एतस्मिन् विषये गार्ग्यः वैयाकरणानां चैके मतान्तरं स्थापयन्ति। तेषां मते यद्यपि कानिचित् पदानि आख्यातजानि तथापि सर्वाणि नामानि न तथा आख्याताजानि इति। तदर्थं ते एवमभिप्रयन्ति। यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेन अन्वितौ स्यातां संविज्ञातानि तानि | गौः अश्वः, पुरुषः, हस्ती इत्यादिषु उदाहरणेषु नाम्नां आख्यातजत्वं वक्तुं न शक्यते। पुनश्च यदि सर्वाणि नामानि आख्याजतानि स्युः तर्हि यः कश्चन तत् कर्म कुर्यात् सर्व तत् सत्वं तथा कथयेयुः। यथा यः कश्चन अध्वानं अश्नुवीत सः अश्व इति वचनीयः स्यात्। एवं यावद्भ्यो भावेभ्यः संप्रयज्येत तावद्भ्यः नामधेयप्रतिलम्भः स्यात्। यथा स्थूणा एव दरशया सज्जनी इत्येवं स्यात्। पुनश्च वस्तुतो एतेषां न्यायवान् कार्मनामिकः संस्कारो वा यथा तथा एतानि आचक्षीरन्। यथा पुरुषं पुरिशयः इति आचक्षीरन्। वस्तुतः शाकटायन: निष्पन्ने अभिव्याहारे अभिविचारयन्ति। यथा प्रथनात् पृथिवी इति आहुः। एवं शाकटायनः अनन्विते 'अर्थे अप्रादेशिके विकारे पदेभ्यः पदेतरार्धान् संचस्कार। सत्वपूर्वो भाव इत्यस्ति नियमः। एवं चेत् अपरस्मात् भावात् कथ पूर्वस्य नाम्नः प्रयोगः। इति बहुधा गार्गयेण शाकटायानमतं न स्वीकृतम्।

यास्कस्तु गार्ग्यमतं सर्व लोकयुक्त्या एव निरस्यति। यदि शास्त्रेण सर्वत्रापि नाम्नां आख्यातजत्वं वक्तुं शक्येत तत्र को दोषः इति सामान्ययुक्तिः। एवं यद्यपि समानकर्माणामपि नामधेयप्रतिलम्भः एकेषामेव सम्भवति न तु सर्वेषाम्। यथा तक्षा, परिव्राजकः, जीवनो भूमिज इति। अत्र यद्यपि सर्वेपि जन्तवः भूमिजाः एव तथापि केवलं कुजस्यैव भूमिज इति नामधेयः। एवं बहुषु भावेषु युक्तेषु केषाञ्चिदेव नामलाभः

न तु सर्वेषाम् । यथा तक्षादिभिः कर्मान्तरेषु व्यापृतैः केषांचनैव तक्षा इति नामलाभः । न्यायवान् कार्मनाम् अपि कुत्रचित् दृष्टम् यथा व्रततिः दमूना, जाट्य इत्यादि । एवं निष्पन्ने अभिव्याहारे योगपरीष्टिः सम्मतैव । पुनश्च यदि नामधेयप्रतिलम्भाय दृष्टप्रवादाः एव स्वीर्रियते चेत् सर्वेपि दृष्टप्रवादाः उपालम्भनीयाः स्युः । शास्त्ररीत्या या संस्कारान् कुरुते । तत्र न कोपि दोषः । अतः शाकटयायनमतमेव साधुः । अपरस्मात् भावात् पूर्वस्य नामधेयप्रतिलम्भोपि लम्बचूडः, विल्वादः इत्यादिषु उदाहरणेषु दृश्यन्ते एव । एवं च शास्त्रदृष्ट्या पर्यालोच्यमाने यास्कमतेन सर्वाणि नामानि आख्यातजानि एव भवन्ति ।

## निर्ब्रूत

**1. आचार्यः** - आचारं ग्राहयति, आचिनोति अर्थान्, आचिनोति बुद्धिमिति वा आचार्यः। आ पूर्वकस्य गत्यर्थकस्य चर् धातोः ण्यत् प्रत्यये आचार्य इति रूपम् ।

**2. निघण्टुः** - निगमनार्थकस्य नि पूर्वकगम् घातोः तप्रत्यये आदेशप्रययादिना विकारे जाते निघण्टुरिति रूपम् । निगमनात् निश्शेषेण अर्थावगमनात्, आ तत्वात् वेदसंहितासु पठितत्वात्, आहननात् एकत्र समाहरणात् वा निश्शेषेण अर्थावगमनात् निघण्टुरिति ।

**3. कुल्माषाः** - कुत्सिताः माषाः कुल्माषाः । कुलेषु सजातीयान्नसोषु सीदन्ति भ्रष्टाः भवन्तीति कुल्माषाः अभक्ष्याः माषाः इत्यर्थः ।

**4. शाखा** - ख शेरते इति खशयाः एव शाखाः । खे आकाशे शेरते व्याप्य वर्तन्ते इत्यर्थः। अथवा शक्नोतेर्वा शाखा इति । पृषोदरादित्वात् ककारस्य खकारे वर्णविपर्ययादिना साधु ।

**5. अद्य**- अस्मिन् द्यवि अद्य । धुरिति अह्नः दिवसस्य नामधेयम् । द्योतते प्रकाशते इति द्युः ।

**6. अन्यः** - नानापत्यम् पुमान् नानेयः । अन्यो नाम नानेयः। न आनेतुं योग्यः इत्यर्थः । सतां वा न अनेयः अन्यः।

**7. वरः** - वरयितव्यो वरः । वरणार्थकस्य वृञ् धातो अप् प्रत्यये निष्पन्नं रूपम् ।

**8. दक्षिणा** - समर्धयत्यर्थकस्य दक्षधातोः निष्पन्नं रूपं दक्षिणेति । यज्ञे तावत् दक्षिणा यत्किञ्चित् वृद्धिरहितं तत्सर्वं दक्षिणयाः वृद्धिमत् करोति इति भावः। दक्षिणादानसमये गृहीतदक्षिणस्य प्रदक्षिणागमनात् वा दक्षिणा इति प्रयोगः। दिशमभिप्रेत्यापि दक्षिणा इति वक्तुं शक्यते । सा हि दक्षिण दिशि गच्छतीति वा दक्षिणा ।

**9. हस्तः** - हन्त्यनेन इति हस्तः । तेन हि अवश्यं हन्यते ।

**10. वीरः** - वीरो वीरयत्यमित्रानिति । क्षिपति कम्पति मारयतीत्यर्थस्य विपूर्वकस्य ईर् धातोः वीरयति विविधप्रकारं ईरयति क्षिपति, कम्पयति मारयति इति वा वीरः । अथवा वीरयते इति विक्रान्त्यर्थकस्य वीर् धातोः निष्पन्नं रूपं वीर इति । गच्छत्येवासो अभिमुखं शत्रून् इति कृत्वा गत्यर्थकस्य वीधातोर्वा निष्पन्नं रूपं वा वीर इति ।

**11.अध्वर्युः** - अध्वरं सर्वाङ्गसंयोजनेन युनक्ति, अध्वरस्य नेता अन्तं प्रापयिता, अध्वरं कामयते कर्तुमिच्छति इति वा अध्वरयुरेव अध्वर्युः । अध्वरं अधीयानः इत्यर्थे युरिति अनुबन्धेऽपि अध्वर्युरिति रूपम् । अध्वर इति यज्ञनाम । ध्वर इत्यस्य हिंसा अर्थः । यत्र हिंसा नास्ति स अध्वरः ।

**12.अक्षि** - पश्यत्यर्थकस्य चक्षिङ् धातोः ककारलोपे अकारागमे अक्षिरिति रूपम् । ख्यायते दृश्यते ह्यनेन इति अक्षि । व्यक्त्यर्थकस्य अञ् धातो निष्पन्नं रूपमिति आग्रायणः । अनक्ति व्यक्तं भवति इति अक्षि ।

**13.कर्णः** - छेदनार्थकस्य कृन्त घातोनिष्पन्नं रूपं कर्णः इति । गर्भावस्थायामेव निकृत्तद्वारो भवतीति कर्णः । आग्रायणाचार्यस्तु गत्यर्थकस्य धातोः निष्पन्नं रूपं कर्ण इति कथयति । ऋच्छन्ति गच्छन्ति शब्दाः एताविति कर्णौ ।

**14. आस्यम्** - क्षेपार्थकस्य अस् धातोः निष्पन्नं रूपमास्यमिति। अस्यते क्षिप्यत। एतदाभिमुख्येन अन्नमति आस्यम। आस्यन्दते हि एतदन्नमिति वा आस्यम्। आस्यन्दते द्रवीकरोति एतत् अन्नमिति कृत्वा आस्यमिति भावः।

**15. ह्रदः** - ह्लादते अव्यक्तशब्दं हि असौ अभिहन्यमानः करोति इति शब्दकर्मणः ह्लादतेः निष्पन्नं रूपं ह्रद इति। अथवा शीतीमावार्थकस्य ह्लादतेर्वा लकारस्य रलयोरभेद इति कृत्वा ह्रद इति रूपम्। ग्रीष्मे असौ शीतल एव सन् जनान् सुखयतीति ह्रदः।

**16. शिशिरम्** - हिंसार्थकस्य शृधातोः शृणाति हिनस्ति इति शिशिरम्। हिंसार्थकस्येव शम्नातेर्वा शिशिरम्। हिनस्ति तस्मिन् काले अप्रतिबध्यमान एवाग्निरतिशयेन शुष्कान् औषधिवनस्पतीन् च इति शिशिरम्।

**17. नरकम्**- नरकं न्यरकं नीचैर्गमनम्। नीचैरस्मिन् गम्यते इति नरकम्। अथवा नास्मिन् रमणकं स्थानमल्पमपि इति वा नरकम्।

**18. सुरा** - सुनोति इत्यस्य अभिषूयते अनेकैः द्रव्यैः पिष्टादिभिः इति सुरा मद्यम्।

**19. मृगः** - गत्यर्थकस्य माष्ट्रै मृग इति रूपम्। मार्ष्टि गच्छति इति मृगः।

**20.भीमः** - बिभ्यति अस्मात् हि सर्वे एव प्राणिनः इति भीमः।

**21.कुचरः** - चरति कर्म कुत्सितम् इति कुचरः। क्वायं न चरतीति वा कुचरः।

**22. पर्वतः** - शिला शिखरसंधैः पर्ववान् भवतीति पर्वतः। पर्वः पुनः पूरणार्थकस्य पृणाते, तर्पणार्थकस्य प्रीणातेर्वा।

**23. प्रत्तम् अवत्तम्** - अत्र प्रदत्तम् अवदत्तम् इति प्रयोक्तव्ये धात्वादिरेव अवशिष्यते द इति लुप्यते अतः प्रत्तम् अवत्तम् इति रूपद्वयम्। प्रकर्षेण दत्तम् प्रदत्तम्। अवत्तमित्यस्य खण्डमित्यर्थः।

# Unit II

# Mimamsa

मीमांसादर्शनम् पूर्वोत्तरमीमांसाभेदेन चास्ति भिन्नं द्विविधञ्च । तत्र पूर्वमीमांसादर्शनञ्चास्ति खलु जैमिनिमुनिना प्रणीतम् । उत्तरमीमांसां ज्ञानकाण्डस्वरूपं रचितवान् व्यासः । वेदान्तर्गतयज्ञयागादिस्वरूपकर्मकाण्डसम्बन्धे स्वास्तित्वेन समुपस्थिविरोधिवचननिचयस्वरूपाणां वाक्यानां समन्वयात्मिक्या दृष्ट्या चास्येकवाक्यता संस्थापनमेवाऽस्य दर्शनस्य मुख्यमुद्देश्यम् । 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।' –ईशोपनि० मं० २। इति चास्ति कर्ममार्गप्रदर्शकमिदं पूर्वमीमांसादर्शनसम्बन्धावच्छिन्नं सर्वथाविच्छिन्नं मन्त्रात्मक वाक्यम् ।।

अस्मिन् मते कर्मण एवाऽभ्युदयनिःश्रेयसयोः समवाप्तिजनकत्वेन तस्यैव पाशात्येन सर्वतोभावेन च निरूपणीयत्वमवगम्यते । कर्मणा समुत्पन्नं धर्माऽधर्मापरपर्यायभूतमपूर्वमेव साक्षात् कर्मजन्यफलजनकं भवतीति निर्वादितमिदं विषयजातम् । विचारस्यास्य सर्वत्रैव पूर्वमीमांसादर्शनग्रन्थेषु निरूपणीयत्वेन विशेषतोऽयं विचारः सर्वप्राथम्येनाऽस्माभिस्तत्रैवाऽनुभूतो दृष्टिपथे स्मृतिपथे च नीयते । अयञ्च खलु मीमांसाशब्दोल्लेखोऽपि संहिताब्राह्मणग्रन्थेष्वेव मिलतीत्यपि न । तिरोहितमस्ति केषामपि पूर्वमीमांसाविदुषाम् ।

**जैमिनिः**

'मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनि जैमिनिम् ।' (-नीतिशास्त्रतः )। इति पद्यात्मकवाक्यघटकीभूत- 'जैमिनि' इति नामपदजन्यबोधविषयतां गतो जैमिनिमुनिः मीमांसाशास्त्रस्य जन्मदातृत्वेन सर्वतः प्राक् ( ई० पू० ५०० ) कालावच्छेदेन

मीमांसासूत्राणि विरचितवान् । इमानि च सूत्राणि पूर्वमीमांसादर्शनशास्त्रस्य समुपलब्धग्रन्थेष्वतीव सन्ति प्राचीनानीत्यवश्यमेव मन्तव्यम् । अत एव 'चोदना' इति सूत्रस्य श्लोकवात्तिके कुमारिलस्वामीत्थं प्रोट्टङ्कितवान् 'यद् वा वक्तुरभावेन न स्युर्दोषा निराश्रयाः' । (चोदना सू० श्लो० वार्तिक ) । अपि च-'यदा स्वतः प्रमाणत्वं तदाऽन्यन्नैव मृग्यते । निवर्तते हि मिथ्यात्वं दोषाऽज्ञानादयत्नतः'। (-तत्रैव, चो० सू० श्लो• बा० )।

एतेन कुमारिलस्वामी 'चोदना' इति सूत्रमधिकृत्यैव वेदस्याऽपौरुषेयत्वं व्याख्यातवान् । यतः पुरुषप्रणीते एव वस्तुनि भ्रम-प्रमादादिदोषाः सम्भाव्यन्ते वेति वेदस्याऽपौरुषेयत्वमङ्गीकृतवान् मीमासाशास्त्रीति पुरुषप्रणीते च वेदे कुतस्तत्सम्भवः । मीमांसादर्शनशास्त्रस्य प्रथमाध्यायस्य पञ्चमसूत्रीयभाष्यानुसारेणापि शबरमुनिः वेदाऽपौरुषेयत्वमङ्गीचकार, तदेव प्रस्फोरयति । तथाहि- 'तस्मात् कारणादवगच्छामो न कृत्वा सम्बन्धं व्यवहारार्थं केनचित् वेदाः प्रणीताः ।' इति । (-मीमांसाद० प्र० अ० ५ सूत्रभाष्ये) ।

पूर्वकालवर्तिनामपि आत्रेय-आश्मरथ्य-ऐतिशायन-लाबुकायन-कार्णाजिनि-कामुकायन-बादर्यादीनां प्राचीनाचार्यचरणानां पूर्वमीमांसादर्शनशास्त्रिणामेतेषां सूत्रीयोल्लेखदर्शनात् तत्र बोधायनभाष्यमप्यासीत् सल्लिखितं यच्च साम्प्रतं नैवोपलभ्यते इति । पूर्वमीमांसाशास्त्रस्य सर्वतः प्राचीनास्तावदाचार्या वृत्तिकारत्वेन सन्ति प्रसिद्धि लभमानाः 'श्रीउपवर्ष'-नामानो मीमांसाशास्त्रपारङ्गता इति । एतेषां मतस्य साधारणतयोल्लेखं कृतवान् मीमांसाभाष्ये शाबरभाष्ये च श्रीशबरस्वामी तथा शारीरकभाष्ये श्रीशङ्कराचार्यः ।

**श्रीकुमारिलभट्टः**

कुमारिलभट्टनये ज्ञानसामान्यमेव चास्त्यतीन्द्रियम् । तदपि लौकिकविषयताशून्यमेव विज्ञेयम् । तथा च आत्मसमवेतलौकिकविषयतासम्बन्धेन प्रत्यक्षत्वावच्छिन्नं प्रति धर्मादिवत् तादात्म्येन ज्ञानस्य प्रतिबन्धकत्वं

वाच्यमित्यभिप्रायः । ज्ञानेन खलु विषये 'ज्ञातता' नामकः कश्चिद्धर्मो जन्यते । स च धर्मो 'मया ज्ञातो घटः' इति प्रतीतिसाक्षिको विषयताविशेषः प्रत्यक्षसिद्धो विज्ञेय इति । अत एव सा ज्ञातता ज्ञानजन्या प्रत्यक्षेति गीयते, तया च प्रत्यक्षप्रमाणसिद्धज्ञाततया ज्ञानमनुमीयते । तथाहि- 'इयं घट-पटादि विषयनिष्ठा ज्ञातता घटत्वप्रकारकघटविशेष्यक ( अयं घटः) इति ज्ञानजन्या घटनिष्ठज्ञाततात्वात्' इत्यनुमानेन साध्यतावच्छेदककुक्षिनिक्षिप्तं ज्ञानं ज्ञायते, अनुमीयते ।

अयञ्च कुमारिलभट्टः ६२०-७०० ईसवीयकालवतित्वेन स्वास्तित्वसम्पन्नो मीमांसादर्शनवार्त्तिकनिर्माता सन् सुब्रह्मण्यावतारभूतत्वेन परिगण्यते स्म । अपि च शाबरभाष्यस्य श्लोकवार्तिक-तन्त्रवातिक-टुप्टीकानां व्याख्याननामपि कर्ता खल्वयमेव कुमारिल भट्टः श्रयतेऽनुभूयते च द्रविडदेश निवासी चाऽयं भट्टः । अयमेव चास्ति स्वीयमतस्य स्वयमादिप्रवर्तक इत्यपि विज्ञेयम् । परिगणितेषु प्रमाणेषु श्रीकुमारिलभट्टः प्रत्यक्षाऽनुमानोपमानशब्दाऽर्पत्तयनुपलब्धीनां षण्णां प्रमाणानामङ्गीकुर्वाणश्चास्ति खल्वभिहितान्वयवादसार्थको नत्वन्विताऽभिधानस्येति । अपि चाऽयं कुमारिलभट्टोऽपूर्वार्थविषयकनिश्चिता ऽबाधितदोषरहितकारणतो जायमानं लोकसम्मतं यत्तदेव प्रमाणम् इति वदति । तदतिरिक्ता अपि भाट्टास्तदेव समर्थयन्ति ।

**श्रीप्रभाकरः**

मीमांसा दर्शनशास्त्रवेत्तृषु तथा तत्प्रवर्तकेषु च मीमांसकेषु पूर्णतया प्रसिद्धि लभमानोऽयं ( ६५०-७२० ) ईसवीये काले सर्वथा वर्तमानः 'गुरु' शब्देनोच्यमानः 'गुरु' पदजन्यबोधविषयतां गतो वा श्रीप्रभाकर : स्वीयमीमांसादर्शनशास्त्रे स्वमतस्य स्थलविशेषेषु किमपि वैलक्षण्यं वैजात्यञ्च दर्शितवान् । यथा तत्रैव श्रीप्रभाकरः खलु ज्ञानस्य व्यवसायात्मकस्य स्वप्रकाशतां स्वीकरोति । गुरूणां नये ज्ञानमात्रस्य मिति-मातृ-मेय-तत्त्रितयविषयकत्वमङ्गीकृतमस्ति । अत एव प्रभाकरमते इन्द्रियसंयोगाद्यनन्तरं 'घटमहं जानामि' इत्याकारकं प्रत्यक्षं जायते । तन्मते

ज्ञानसामान्यस्यैव प्रमात्वेनाऽप्रमास्वरूपं ज्ञानमेव नास्ति अतः या कारणकूटात्मिका सामग्री ज्ञानं समुत्पादयति सैव सामग्री तादशज्ञाननिष्ठं प्रामाण्यम्-प्रमात्वम् याथार्थ्यमपि गृह्णाति इत्यतो ज्ञानस्य स्वप्रकाशत्वं ज्ञानग्राहकसामग्रया गृह्यमाणत्वेन साधु सङ्गच्छते।

ज्ञानस्य तनिष्ठप्रामाण्यस्य च ज्ञानान्तरग्राह्यत्वाङ्गीकारे तादृशज्ञानान्तरस्य ज्ञानार्थ पूनर्ज्ञानान्तरापेक्षायां जायमानायामनवस्थायाः प्रसङ्गभङ्गार्थं ज्ञानस्य स्वप्रकाशतापक्ष एव श्रेयान्। अयञ्च श्रीप्रभाकरः स्वनिष्ठगुरुत्वभूषणभूषितः सन्नपि श्रीकुमारिलशिष्यः कारणविशेषवशादेव गुरुत्वमापन्नो निरुच्यमानान् श्रीभट्टाभिमतान् सिद्धान्तान् अंशतोऽनभ्युपगच्छन् प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यात्मकानि पञ्चप्रमाणानि एवाङ्गीकरोति। लघ्वी-बृहती-नामकटीकाद्वयस्य शाबरभाष्यस्योपरि कृतस्य रचयिता चास्त्ययं मीमांसकः श्रीप्रभाकरः।

### श्रीमुरारिमिश्रः

मुरारिमिश्राणां नयेऽनुव्यवसायेन घटमहं जानामि इत्याकारकेण 'अयं घटः' इत्याकारको ज्ञानरूपो व्यवसायो गृह्यते, तनिष्ठं प्रामाण्यञ्चापि तेनैव गृह्यते। इत्येते त्रयोऽपि मीमांसकाः सन्ति प्रामाण्यस्य स्वतोग्राह्यत्ववादिना इति। अयञ्च श्रीमिश्रो मीमांसकः (११५०-१२२०) ईसवीये काले सन्तिष्ठमानः सन् 'मुरारेस्तृतीयः पन्था' इत्युक्ति चरितार्थयनासीत्। अत एव मीमांसाशास्त्रान्तर्गततृतीयसम्प्रदायस्य प्रवर्तकोऽभूदिति प्रसिद्धोऽयं विषयः। गङ्गशोपाध्यायेन तथा तदात्मजेन श्रीवर्धमानोपाध्यायेन स्वीयग्रन्थेषु श्रीमुरारिमिश्रस्य तन्मतस्य च समुल्लेखो व्यधायि। श्रीमुरारिमिश्रः श्रीभवनाथमिश्रस्यापि मतस्य खण्डनं कृतवान्।

एवमस्य श्रीमुरारिमिश्रस्य- १. 'त्रिपादीनीतिनयन', २. “एकादशाध्ययाधिकरण'- नामको खल्वधिकरण-विवेचनात्मकौ द्वावेव ग्रन्थावेतावत्कालावच्छेदेन समुपलभ्येते। त्रिपादीनीतिनयने'ति नामजन्यबोधविषयतावती मीमांसासूत्राणां प्रथमाध्यायस्य द्वितीयादिचतुर्थपादान्ता

'त्रिपादीनीतिनयन'. नाम्नी काचिदस्ति टीका ग्रन्थाकारा या ग्रन्थनाम्नापि व्यवह्रियते च।

## श्रीमण्डनमिश्रः

अयञ्च श्रीमण्डनमिश्रः कुमारिलभट्टस्य प्रधानशिष्यः (८०० ) ईसवीयकालवर्त्ती मीमांसाशास्त्रीयप्रतिभाभास्वरः सन् मीमांसादर्शनशास्त्रस्य प्रौढविद्वान् आसीत् । शङ्कराचार्यदिविजयानुसारमियमस्ति प्रसिद्धिर्यत् श्रीशङ्कराचार्येण सहास्य शास्त्रार्थो जातस्तत्र पराजयप्राप्त्यनन्तरं तुरीयावस्थायामयं श्रीमण्डनमिश्रः श्रीशङ्कराचार्यनिरूपितां शिष्यतां लेभे इति च नास्ति तिरोहितोऽयं विषयः केषामपि दार्शनिकविदुषाम्। तथाऽयमेव पुनः सुरेश्वराचार्यनाम्नाऽपि प्रसिद्धिं प्राप्तवान्। अस्य ग्रन्थाः-१. 'विधिविवेकः' (विध्यर्थविचारापरपर्यायभूतो ग्रन्थः ), २. 'मीमांसानुक्रमणी', ३. 'विभ्रमविवेकः' (पञ्चानां ख्यातीनां व्याख्यानात्मको विचारः), ४. 'मीमांसासूत्रानुक्रमणी' (मीमांसासूत्राणां श्लोकबद्धो विचारः), ५. 'भावनाविवेकः' (आर्थीभावनाख्यः मीमांसारूपः) इत्यादिग्रन्थानामुपर्युक्तानां चास्ति विनिर्माणकर्ता श्रीमण्डनमिश्रः। अयञ्चास्ति महानेवोपकारः पूर्वमीमांसाशास्त्रस्य।

अयञ्च श्रीमिश्रो मैथिलब्राह्मणवंशावतंसः पाटलीपूत्रनिवासी चासीत् । श्रीमण्डनमिश्रविरचितविधिविवेकग्रन्थस्योपरि श्रीवाचस्पतिमिश्रः एका 'न्यायकणिका'- नाम्नी टीकां लिखितवान् यया विशदीकृतवान् विधिविवेकम्।

## श्रीशबरस्वामी

अयञ्च श्रीशबरस्वामी ( २०० ) ईसवीयकालान्तर्वर्ती सन् समस्तद्वादशध्यायान्तर्गतसूत्राणामुपरि विस्तृतं प्रामाणिकञ्च भाष्यं यच्च 'शाबरभाष्य नाम्ना चास्ति प्रसिद्धिं गतं विरचितवान् । इदञ्चास्ति भाष्यं सर्वथा मीमास शास्त्रीयवैदुष्यपरिपूर्णमिति सर्वेऽपि मीमांसका विदन्ति, वदन्ति च । अयञ्चापि शाबरभाष्यनामको ग्रन्थस्तुलनात्मिकया दृष्ट्या विचार्यमाणे महर्षि पतञ्जलिना

विरचितेन महाभाष्येण तथा श्रीशङ्कराचार्यविरचितेन शङ्करभाष्येण साम्यं खलु बिभर्तीति नात्र किमपि विचारणीयमस्ति। अस्य श्रीशबरस्वामिविषये यद्यपि चास्ति बहवक्तव्यमन्यदपि । तथापि बहवक्तव्यं नात्र प्राकाश्यं नीयते लेखविस्तरभयात् बहुवादिविदुषामसम्मतवाचेति पुनर्द्वितीयाद्यावृत्तौ तदुल्लेखो भविष्यति इति।

## पार्थसारथिमिश्रः

अयञ्च श्रीपार्थसारथिमिश्रः ११५०-१२२० ईसवीये काले स्वास्तित्वसम्पन्न आसीत् इति श्रयते । श्रीयज्ञात्माऽऽत्मजो मैथिलवंशावतंसो ब्राह्मणशरीरावच्छिन्नो भाट्टमार्गाऽनुगामी चासीदित्यपि खलु श्रूयते एव । अयं महानुभावो विद्वान् 'टुप'-टीकायास्तन्त्ररत्ननाम्नी तथैव च श्लोकवार्तिकस्य रत्नाकरनिभां न्यायरत्नाकराख्यां टीकाम्, एवं मीमांसासूत्राणां द्वादशाध्यायानाञ्च शास्त्रदीपिकाऽभिधानी टीका रचयामास । अपि च न्यायरत्नमालाऽप्यस्ति पार्थसारथिमिश्रविरचिता, यत्र श्रीमिश्रः स्वतः प्रामाण्यवादस्य व्याप्तिप्रभृतिसप्तविषयाणाञ्च स्वातन्त्र्येण विशदीकृतं समीक्षणं सन्निहितवान्। अस्यैव 'न्यायरत्नमाला'-नामकग्रन्थस्योपरि चास्ति श्रीरामानुजाचार्यस्य 'नाणकरत्न' नामकं व्याख्यानं यच्चेदानीमेव प्रकाशितं जातम्, इत्यादिरूपेणाऽस्यापि महानुभावस्य श्रीपार्थसारथिमिश्रस्य मीमांसादर्शनशास्त्रस्य कृते बहु देयमस्तीति स्वयमनुभूयताम्।

## श्रीवाचस्पतिमिश्रः

एवमेव षड्दर्शनाचार्यः श्रीवाचस्पतिमिश्रः नवमशतकेसवीये (९००) तत्त्वबिन्दुग्रन्थस्योपरि 'भावनाविवेक'नाम्नी टीकाम्, 'न्यायकणिका'ऽभिधानीञ्च टोकां विरचितवान् मीमांसादर्शनशास्त्रे । अयञ्च श्रीमिश्रः कुमारिलभट्टमार्गानुगामी आसीदिति श्रूयते, इति महानेव संक्षिप्तोऽयं विषयः।

## अन्ये केचन आचार्याः

श्रीशालिकनाथः ६९०-७६० ईसवीये सन्तिष्ठमानः प्रभाकरनिरूपितां शिष्यतां बिभ्राणः, स्वकीयगुरोः श्रीप्रभाकरस्य 'लघ्वी'-टीकाया उपरि 'ऋजुविमलां'-नाम्नी टीकां विहितवान्, 'बृहती'-टीकाया उपरि 'दीपशिखा'ऽभिधानी टीकां कृतवान्, तत्र च 'गुरुमतसमर्थनं हृदयतः सुचारुतया च विहितवान् । वेदान्तदेशिकः १२६९-१३७६ ईसवीये वर्षे स्वीयं शास्त्रीयं जीवनं यापयन् 'वेङ्कटनाथे'त्यपरनामधेयः खलु दाक्षिणात्यकुलभूषणभूषितः मीमांसासूत्राणामुपरि टीकां विदधानः रामानुजसम्प्रदायाचार्यः का विद्वानासीत् ।

श्रीमाधवाचार्यः १२९७-१३८६ ईसवीये स्वस्थितिं लभमानः वेदभाष्यकर्तृ-श्रीसायणस्य ज्येष्ठभ्राताऽयं 'विद्यारण्ये'त्यपरनामधेयो विविधग्रन्थनिर्माता 'न्यायमालाविस्तर'- नाम्न्या द्वादशलक्षणवत्याष्टीकाया: प्रसिद्धि प्राप्तष्टीकाकार आसीत् । श्रीखण्डदेवः काशीनिवासी दाक्षिणात्यकुले जन्म लभमानो ब्राह्मणशरीरावच्छिन्नः सन् श्रीरुद्रदेवात्मजः पण्डितराजश्रीजगन्नाथस्य पितृचरण श्रीपेरुभट्टस्याऽयं साक्षादेव गुरुरासीत् । तथा मीमांसाशास्त्रस्य भाट्टकौस्तुभ, भाट्टदीपिका, भाट्टरहस्यानां, त्रयाणामेतेषां ग्रन्थानां रचयिताऽऽसीत् । श्रीअप्पयदीक्षितः १५२०-१५९३ ईसवीये वर्षे स्वास्तित्वसम्पन्नः मीमांसाविधिरसायन'-ग्रन्थनिर्माणकर्ता श्रीरंगराजाध्वरीन्द्र धुरीणपुत्रो ब्राह्माणत्वजात्यवच्छिन्नो दाक्षिणात्यकुले जन्म लभमान आसीत् ।

श्रीरामकृष्णभट्टोऽपि १७०० ईसवीये वर्षे संस्कृतजनताजनार्दनस्योपकारमावहन् विद्वन्मूर्धन्यः पूर्वकालावच्छेदेन मालवप्रान्ते निवासं विदधानस्तदनन्तरकालावच्छेदेन वाराणसीनिवासी चायं जात इति श्रूयते । तथा 'युक्तिस्नेहप्रपूरणी'-नामिकायाष्टीकायाः कर्ताऽप्यासीत् । श्रीआपदेवः १५८०-१६५० ईसवीये काले स्वस्थितिं लभमानः स्वास्तित्वं स्वीयं जीवनञ्च सुचारुतया निर्वहन् 'मीमांसान्यायप्रकाशम्' मौलिक ग्रन्थं रचितवान् । अस्य ग्रन्थस्य 'आपोदेवी'त्यपि

चास्ति खल्वपरं नामधेयम् । एकनाथमहात्मनो वंशे स्वजनिं लभमानो दाक्षिणात्यकुले जातो ब्राह्मणत्वजात्यवच्छिन्नोऽनन्तस्य पुत्रोऽयं विद्वान् काशीवास्तव्य आसीत् ।

## मेल्पुत्तूर् नारायणभट्टतिरि

भारतराष्ट्रे केरलराज्ये जन्म प्राप्तवत्सु संस्कृतसाहित्यसपर्यां कृतवत्सु महात्मसु सर्वप्रथमं स्थानम् अद्वैताचार्यस्य श्रीशङ्करस्य, तदनन्तरं स्थानं श्रीमतः नारायणभट्टपादस्य इति भूयसाम् आधुनिकगवेषकाणाम् अभिप्रायः । केरलीयभाषाभूते मलयाळे नारायणभट्टतिरि (नारायणभट्टश्रीः इति संस्कृते) इति प्रथितः अयं भट्टापादः श्रीकृष्णभक्तिमयस्य नारायणीयम् इति स्तोत्रकाव्यस्य रचनां कृतवान्, गुरुवायुपुरे श्रीकृष्णमन्दिरे विग्रहस्य पुरतः प्रतिदिनम् एकं दशकम् इति क्रमेण दिनशतेन इदं काव्यं पठित्वा स्वस्य तीव्रवातरोगात् विमुक्तः अभवत् इति ऐतिह्यं प्रसिद्धं भवति । मीमांसा, व्याकरणं , ज्योतिषं, तर्कः इत्यादिषु नानाशास्त्रेषु निष्णातः नारायणभट्टः अम्बरनदीराजस्य देवनारायणस्य आज्ञया प्रक्रियासर्वस्वं नाम व्याकरणग्रन्थस्य रचनां षष्ट्या दिनैः ( by 60 days ) कृतवान् । सः वदति –

भूखण्डे केरळाख्ये सरितमिह निळामुत्तरेणैव नावा-

क्षेत्राद् गव्यूतिमात्रे पुनरुपरिनवग्रामनाम्नि स्वधाम्नि ।

धर्मिष्ठाद्भट्टतन्त्राद्यखिलमतपटोर्मातृदत्तद्विजेन्द्रा-

ज्जातो नारायणाख्यो निरवहदतुलां देवनारायणाज्ञाम् ॥

इतः ज्ञायते तस्य गृहम् उपरिनवग्रामः ( मेल्पुत्तूर् इति मलयाळभाषायाम् ), तच्च निळायाः (इदानीं भारतप्पुषा इति प्रथितायाः नद्याः ) तीरे नावामुकुन्ददेवमन्दिरात् नातिदूरे, पिता मातृदत्तनामकः नम्पूतिरिब्राह्मणः च इति ॥ स्वस्य शिक्षाविषये भट्टापादः वदति –

मीमांसादि स्वतातान्निगममविकलंमाधवाचार्यवर्यात्-

तर्कं दामोदरार्यादपि पदपदवीमच्युताख्याद् बुधेन्द्रात् ।

तेषां कारुण्ययोगात् किमपि च कवितामाप्नवं कर्म चैतद्

भूयात्कृष्णार्पणं मे भवतु च सततंधीरघारेः कथायाम् ॥

एतदनुसृत्य नारायणस्य मीमांसागुरुः पिता एव , वेदगुरुः माधवाचार्यः , न्यायशास्त्रगुरुः दामोदरः, व्याकरणाचार्यः अच्युतपिषारोटिः च आसन् इति । शास्त्रेषु काव्यभेदेषु च भट्टपादः बहून् ग्रन्थान् विरचितवान् । नारायणीयं काव्यं पूर्वं सूचितम् । गुरुवायुपुरेशम् अभिसम्बोध्य शतसङ्ख्यकेषु दशकेषु सहस्राधिकैः पद्यैः तस्मिन् कृष्णकथा वर्णिता अस्ति । अतिमनोहरं काव्यम् इदम् । श्रीपादसप्ततिः इति देवीस्तुतिपरं स्तोत्रकाव्यं बाणभट्टस्य चण्डीशतकस्य समानं वर्तते । धातुकाव्यं व्याकरणशास्त्रकाव्यं भवति यत्र त्रिषु सर्गेषु कंसवधवर्णनेन साकं माधवीयधातुवृत्तिम् अनुसृत्य क्रमेण धातुनिष्पन्नक्रियारूपाणि उदाहृतानि सन्ति ।

देवीस्तुतिनामके स्तोत्रे नव पद्यनि सन्ति येषु कटपयादिसंख्यासम्प्रदायेन ऋग्वेदस्य अष्टकानां वर्गाणाम् अध्यायानां सूक्तानां च संख्याः सूचिताः । स्वस्य उपकारं कृतवतां राज्ञां प्रशस्तयः नारायणेन प्रणीताः सन्ति शैलाब्धीशमानविक्रमप्रशस्तिः, माटमहीशवीर-केरलप्रशस्तिः, अम्बरनदीशदेवनारायणप्रशस्तिः, बिम्बिलीशगोदवर्मप्रशस्तिः च । राजसूयम्, सुभद्राहरणम्, पाञ्चालीस्वयंवरः, मत्स्यावतारः, गजेन्द्रमोक्षः, कुचेलवृत्तम्, अजामिलोपाख्यानम्, अष्टमीचम्पूः इत्यादयः अनेके चम्पूप्रबन्धाः तेन विरचिताः सन्ति यान् उपयुज्य चाक्यारनामक-जातीयाः इदानीमपि देवमन्दिरेषु अनुष्ठेयं “कूत्तु” नामकं क्लारूपम् अवतारयन्ति । शूर्पणखा-प्रलापप्रबन्धे अनुनासिकाः वर्णाः न सन्ति इति सः निरनुनासिकप्रबन्धः इति प्रसिद्धः । व्याकरणे प्रक्रियासर्वस्वम् , अपाणिनीयप्रमाणता इति ग्रन्थतल्लजद्वयं विशेषतः उल्लेखनीयं वर्तते ।

पाणिनेः अष्टाध्याय्यां येन क्रमेण सूत्राणि पठितानि तेन क्रमेण एव पुरातनकाले सूत्राणाम् अर्थप्रतिपादनम् उदाहरणप्रदर्शनं च आसीत् । अत्यन्तं सङ्क्षेपेण, स्मरणसौकर्यापेक्षया च पाणिनिना सूत्राणां क्रमः स्वीकृतः । अतः सूत्रेषु शब्दानाम् आवर्तनं यावच्छक्यं परिहृतम् । एकस्य सूत्रस्य अर्थज्ञानाय तस्मिन् सूत्रे विद्यमानानाम् ऊह्यानां वा शब्दानाम् अपेक्षया अधिकाः शब्दाः आवश्यकाः सन्ति तर्हि पूर्वसूत्रेभ्यः ग्रहीतुं शक्यन्ते इति अस्य क्रमस्य सौष्ठवम् । काशिकायाम् अष्टाध्यायीक्रमेणैव सूत्राणाम् पाठः, अर्थप्रतिपादनम्, उदाहरणं च सन्ति । एवं रीत्या पाणिनीयसूत्रशिक्षणस्य काशिकाप्रस्थानम् इति नाम अधुना व्याकरणशास्त्रिभिः कथ्यते । शब्दानां रूपनिष्पत्तिप्रतिपानाय अष्टाध्याय्याम् एकत्र पठितस्य सूत्रस्य अनन्तरम् अपरत्र पठितस्य सूत्रस्य अपेक्षा स्यात् । अतः प्रक्रियाज्ञाने क्लेशः अस्ति इति अस्य प्रस्थानस्य दोषः ।

धर्मकीर्तेः रूपावतारे, विमलसरस्वत्याः रूपमालायां, रामचन्द्रदीक्षितस्य प्रक्रियाकौमुद्यां च अष्टाध्यायीक्रमं त्यक्त्वा प्रक्रियानुसारेण सूत्राणि विन्यस्य व्याख्यातानि उदाहृतानि च । इमां रीतिं कौमुदीप्रस्थानमिति कथयन्ति वैयाकरणाः । नारायणभट्टः ( 1560-1666 क्रि.सं.), तस्य समकाले जीवितवान् भट्टोजिदीक्षितः ( 1550-1630 क्रि.सं.) च प्रक्रियानुसारेण सूत्राणि प्रतिपादितवन्तौ । नारायणभट्टस्य प्रक्रियासर्वस्वं भट्टोजिदीक्षितस्य वैयाकरण-सिद्धान्तकौमुदी च कौमुदीप्रस्थाने अन्तर्भवतः । तौ महान्तौ परस्परं न दृष्टवन्तौ, परस्परस्य ग्रन्थान् अपि न दृष्टवन्तौ । कर्णाकर्णिकया दीक्षितः नारायणस्य महत्त्वं श्रुतवान् इति ऐतिह्यं प्रचलति । सिद्धान्तकौमुद्याः महान् प्रचारःअभवत् । इदानीमपि व्याकरणपठने सा एव अधिकतया आश्रीयते ।

नारायणभट्टकृतं पूर्वमीमांसाग्रन्थो भवति मानमेयोदयः। अत्र द्वौ परिच्छेदौ मानपरिच्छेदो मेयपरिच्छेद इति । आद्ये प्रमाणानि द्वितीये प्रमेयानि च कुमारिलमतानुसारेण परमतनिराकरणपुर्वं निपुणं निरूपितानि । मीमांसकसम्मतानां पदार्थानामेतदपेक्षया सुखतरव्युत्पादको ग्रन्थोऽतिविरल एव ।

तत्र प्रमाणपरिच्छेदेस्य प्रणेता पण्डितकविचूडामणिः केरलीय्प् नारायणभट्टः यस्य वृत्तान्तं नारायणियोपोद्घाते वितत्यावोचाम। यद्यपि-

मानमेयविभागेन वस्तूनां द्विविधा स्थितिः।

अतस्तदुभयं ब्रूमः श्रीमत्कौमारिलाध्वना॥

इति प्रमेयपरिच्छेदोऽपि चिकीर्षिततयानेन प्रतिज्ञातः, तथापि कुतस्मिचदसौकर्याद् मने, स न कृतः। अत एवार्धानिर्मितमिमं ग्रन्थं शैलाब्धीश्वरस्य मानवेदनृपतेश्चोदाअनुसारात् प्रमेयपरिच्छेदरचना कृष्णशिष्योऽन्यो नारायणपण्डितः पूरयामास। तथा च ग्रन्थान्ते श्लोकाः-

यत्कीर्तिर्न हि माति हन्त महति ब्रह्माण्डभाण्दोदरे

यस्यज्ञां प्रणतैः शिरोभिरनिशं धत्ते नृपाणां गणः।

सोऽयं नाटकतर्ककाव्यनिपुणः प्रज्ञातपातञ्जलो

भक्तश्चक्रिणि मानवेदनृपतिर्जागर्ति धात्रीतटे॥

पृथ्वीवृत्रजिता नितान्तमहितेनैतेन सञ्चोदितै-

रस्माभिः कृशशेमुषीविलसितैरभ्यासहीनैरपि।

प्राङ् नारायणसूरिणार्धरचितं तन्मानमेयोदयं

मोहात् पूरयितुं कृता मतिरियं सन्तः प्रसीदन्तुः नः॥

यः ख्यात पुरुषोत्तमस्त्रिजगति प्रज्ञाकवित्वादिभिः

पुत्र्यास्तस्य सुतस्तदीयतनयात् कौमारतन्त्राम्बुधेः ।

सुब्रह्मण्य इति त्रिलोकविदितादापीतशास्त्रामृतः ।

सोऽयं पूरितवानिदं प्रकरणं नाम्ना च नारायणः ॥

# मानमेयोदयः

## प्रमाणपरिच्छेदः

### प्रत्यक्षपरीक्षा

आचार्यमतपाथोधौ बालानपि निनीषताम् ।

धीमतां कोऽपि गोपालपोतः पोत इवास्तु नः ॥१॥

मानमेयविभागेन वस्तूनां द्विविधा स्थितिः।

अतस्तदुभयं ब्रूमः श्रीमत्कौमारिलाध्वना ॥२॥

प्रमाकरणमेवात्र प्रमाणं तर्कपक्षवत् ।

प्रमा चाज्ञाततत्त्वार्थज्ञानमित्येव भिद्यते ॥३॥

अज्ञातपदेनात्र ज्ञातविषययोः स्मृत्यनुवादयोर्निरासः । तत्रानुवादानामप्रामाण्यं तार्किकादीनां नानुमतम् । वयं तु ब्रूमः । अनुवादो ह्यर्थपरिच्छेदे व्यवहारे वा न पूर्वज्ञानात् कश्चिद् विशेषमाधत्ते । अतः फलविशेषाभावात् फलार्थं च प्रमाणानां स्वीकरणात् स्मृत्यादिवदनुवादोऽपि बहिष्कार्य एवेति। नन्वज्ञातावगमस्यैव प्रमात्वे घटोऽयं घटोऽयमिति धारावाहिकज्ञानेषु द्वितीयादीनामप्रमात्वं स्यात् । मैवम् ।

तत्राप्ययमयमित्युत्तरोत्तरेषां कालांशानामज्ञातानामवगमाद् उत्तरे क्षणे घटादिसद्भावस्य च पूर्वज्ञानेनानधिगतत्वात्। ननु कालभेदस्य औपाधिकत्वात् केनोपाधिनावच्छिन्नानां कालांशानामत्रावगम इति वक्तव्यम् । उच्यते । पूर्वपूर्वज्ञानै नितानां प्राकट्यानामुत्तरोत्तरज्ञानपर्यन्तम् अवस्थानात् तदवच्छिन्नानां कालांशानां तत्र तत्रावगम इति। न च प्राकट्यभेदानां सूक्ष्मत्वात् तदवच्छिन्नानां कालभेदानामपि सूक्ष्मतया दुरवगमत्वमिति वाच्यम् । सूक्ष्मत्वे कमलदलशतं सूच्या युगपद् भिन्नमितिवत् सकृदवबुद्धो घट इति यौगपद्याभिमानप्रसङ्गात्। इह त्वयमयमिति पुनः पुनः क्रमेणैव प्रतीतेर्धारावाहिकस्वभावसिद्धत्वाद् यौगपद्याभिमानस्य विरोध एव। तस्मात् प्राकट्यभेदानां कालभेदानां च न सूक्ष्मत्वम् । ननु प्राकट्यस्यैवाभावात् कालस्य च प्रत्यक्षवाभावात् कथं कालांशावगम इति चेद्, न । तयोः साधयिष्यमाणत्वादिति । तत्त्वपदेन भ्रमसंशयादीनामयथार्थज्ञानानां निरासः । तत्रायथार्थज्ञानस्याभावात् तत्त्वपदमनर्थकमिति प्राभाकराः प्राहुः। एवं हि तेषां मतम्- इदं रजतमित्यत्रेदमित्यगृहीतविशेषं शुक्तिशकलं गृह्यते। रजतमिति च रजतमात्रं स्मर्यते । तयोश्च भेदाग्रहात् पुरोवर्तिनि रजतार्थिनः प्रवृत्तिः, न तु शुक्तिशकलस्य रजतत्वेन भानमस्तीति । (तत्) तत्तज्ज्ञानस्य स्वविषय एव प्रवृत्तिकरत्वनियमाद् रजतज्ञानस्यापीदंविषयत्वाभावे तत्र प्रवृत्तिर्न सिध्येत् , तथेदमेव रजतमिति सामानाधिकरण्यं तयोरभेदप्रतीतिं विना न सिध्येदित्यादिदिशा निराकरणीयम् । तस्मादन्यथाग्रहणरूपभ्रमादिज्ञानसद्भावात् तन्निरासार्थ तत्त्वपदम् । तदेवमज्ञाततत्त्वावगमरूपायाः प्रमायाः करणत्वेनेन्द्रियसन्निकर्षादीनां प्रमाणत्वं सिद्धम् । इह च प्रमाशब्देन लक्षणया तत्कार्यभूतस्य प्राकट्यस्यापि प्रतिपादनात् प्राकट्यरूपप्रमाकरणत्वेन ज्ञानस्यापि प्रमाणत्वमाहुः । एतावता च वयं फलप्रमाणवादिन इति गीयामहे। तार्किकास्तु 'प्रमाकरणं प्रमाणम्। यथार्थानुभवः प्रमा ।अनुभवश्च स्मृतिव्यतिरिक्तं ज्ञानमिति लक्षयन्ति। तद अनुवादस्याप्रामाण्यसाधनात् तद्व्यावर्तकस्य च पदस्यात्राभावादतिव्याप्तम्। 'अनुभूतिः प्रमाणम्। स्मृतिव्यतिरिक्ता च संविदनुभूतिरिति प्राभाकराः । तदपि भ्रमादीनां साधनात् तेषामपि स्मृतिव्यतिरिक्तत्वात् तेप्वतिव्याप्तम्। किञ्च सर्वज्ञानेष्वप्यात्मा ज्ञानस्वरूपं विषय इति

त्रितयमपि प्रकाशते । सर्वत्र चात्मस्वात्मांशयोः प्रमाणत्वं प्रत्यक्षत्वमप्यस्तीति तेषां मतम् । ततश्च स्मृतिव्यतिरिक्तज्ञानस्यैव प्रमाणत्वे स्मृतेरात्मस्वात्मांशयोरप्रामाण्यं स्यादित्यव्याप्तिरप्यस्तीति । 'अविसंवादि विज्ञानं प्रमाणम् । अविसंवादित्वं चार्थक्रियाकारित्वमिति बौद्धाः । तत्र भूतभविष्यद्विषयस् अनुमानस्य अर्थक्रियाकारित्वाभावाप्रामाण्यं स्यात् , स्मृतेश्च क्वचिदर्थक्रियाकारित्वात् प्रामाण्यं स्याद्, इति ।

तस्मादज्ञाततत्त्वार्थज्ञानसाधनभेव नः।

प्रमाणमिति निर्तिं तद्विशेषानथ त्रुपे ॥४॥

प्रत्यक्षमनुनातं च शाब्दं चो पमितिस्तथा ।

अर्थापत्तिरभावश्च षट् प्रमाणानि मादृशाम् ॥ ५॥

चार्वाकास्तावदेकं द्वितयमपि पुनः बौद्धवैशेषिको द्वौ

भासर्वज्ञश्च साङ्ख्यास्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति ।

प्राहुः प्राभाकराः पञ्चकमपि च वयं तेऽपि वेदान्तविजाः

षट् पौराणिकास्त्वष्टकमभिदधिरे सम्भवैतिह्ययोगात् ॥

तत्र इन्द्रियसन्निकर्षजं प्रमागं प्रत्यक्षन् । कानि पुनरिन्द्रियाणि । उच्यते । चरसननागस्पर्शनश्रोत्राणि मनश्चेति षडिन्द्रियाणि। चक्षुर्नाम कनीमिकान्तरगतं तेजोऽथ जिह्वाग्रगस्तोयांशो रसनं क्षितेरवयवो घ्राणं च घोगोदरे । सर्वाङ्गप्रसृताश्च मारुतलवास्त्वङ् नाम कर्णोदरव्योभैव श्रवणं मनस्तु विभु तद् देहे च कार्यावहम् ॥

तत्र रूपज्ञानस्य केनचित् कारणेन भवितव्यामिति सामान्येन सिद्धौ दीपादितेजस एव रूपज्ञानहेतुत्वदर्शनात् तैजसं चक्षुः कल्प्यते। तथा रसज्ञानत्यापि कारण कल्पनायां रसव्यञ्जकत्वमपामेव शुष्कवस्तुपु दृष्टमिति रसनमान्यतया कल्प्यते। एवं चन्दनगतत्त्य पार्थिवनिम्बत्वगनुलेपनस्य गन्धाभिव्यञ्जकत्वदर्शनाद् गन्धाभिव्यशपात्लेन कल्प्यमानं घ्राणं पार्थिवं भवति । व्यजनपवनस्य चाङ्गसङ्गिसलिलस्पर्शाभिव्यञ्जकत्वदर्शनात् स्पर्शोपलम्भकस्य त्वगिन्द्रियस्य वायवीयत्वम्। शब्दग्राहकतया कल्यस्य श्रोत्रस्य तु परिशेगादाकाशात्मकत्वम्। चक्षरादीनां खल्वन्येन्द्रियारम्भणारब्धत्वं न दृष्टभिति तेजःप्रभृतीनामन्यन्द्रियारम्भकत्वात् तेषां श्रोत्रत्वं न भवति। भूतात्मकत्वमेव च बहिरिन्द्रियाणां दृष्टभित्यवशिष्टस्याकाशाख्यस्य भूतस्यैव श्रोत्रत्वमिति। ताकिौस्तु शइस्याकाशगुणत्वात् तद्राहकरय श्रोत्रस्याकाशात्मकत्वमिति साधयन्ति। तत् तस्य गुगत्वासिरयुक्तम्। मनस्तु सुखाद्यपरोक्षज्ञानसाधनेन्द्रिय बेन कल्यते। तस्य च विभुवं साधयि यते। तथापि शरीरावच्छिन्नस्यैव तस्येन्द्रियत्वमिति तत्प्रदेश एव कार्याणि करोति। रूपाविज्ञाने वपि तच्चक्षुरादिपरतन्त्रं प्रवर्तत एव, अनुमा. नादिष्वी लिङ्गादिसहायमिति स्थितिः। अत्र चक्षुःश्रोत्रयोः प्राप्यकारित्वे विवादोऽस्तीति तयोरपि बहिरिन्द्रियत्वात् त्वगादिवत् प्राप्यकारित्वं साधनीयम्। ततश्च चक्षपः पृथुतरपृथिवीधरादिदर्शनात् पृथ्वगत्वमपि तेजःस्वभावसिद्धमाश्रयणीयम्। तथोन्मीलनक्षण एव दूरतरशनैश्चरादिदर्शनाद् व्या-यावस्थितेन बाह्यतेजसा निर्गमनसमय एवैकीभावः कल्पनीयः। न च बाह्यतेजसः सकलव्यापित्वात् केरलेभ्योऽपि गङ्गादर्शनप्रसङ्गः। अदृष्टो पर हीतेनैवालोकभागनेकीभावात्। तार्किकास्तु तदिदं दूरदर्शनं बेगातिशयात् साधयन्ति। तदनन्तयोजनान्तरितेष्वपि शनैश्चरादिषु झटितिदर्शनं वेगमात्रादसम्भाव्यमित्युपेक्षितमस्माभिः। एतानि च चक्षुदीन्य जुद्भूतरूपस्पर्शत्वात् प्रत्यक्षेण न गृह्यन्त इति सिद्धानीन्द्रियाणि। सन्निकर्षस्तु द्विविधः संयोगः संयुक्ततादात्म्यं चेति। तत्र पृथिव्यप्तेजसां चक्षुस्त्वगिन्द्रियाभ्यां संयोगाद् ग्रहणम्, वायोस्त्वक्संयोगाद, दिङनभस्तमसों दृक्संयोगात्, शब्दस्य श्रोत्रसंयोगाद्, आत्मनो मनःसंयोगात्। अत्र विभुनोरप्योत्तमनसोरजन्यसंयोगसाधनात्

संयोगः। कॉलस्य तु युगपदादिप्रत्ययस्य कालविषयत्वेन्द्रियजन्यत्वयोर्वक्ष्यमाणत्वात् तस्य च सवेन्द्रियजन्यत्वात् सर्वैरपीन्द्रियैः संयोगाद् ग्रहणम्। यदा तु चक्षुरादिसंयुक्तेषु पूर्वोक्तेषु पृथिव्यादिषु तदात्मभूतानां जातिगुणकर्मणां ग्रहणं, तदा संयुक्ततादात्म्यं सन्निकर्षः। तदुक्तं

"रूपादीनां तु संयुक्तद्रव्यतादात्म्यमेव नः।

प्रतीतिकारणं तस्मान्न सम्बन्धान्तरस्पृहा ॥"

इति । यदा तु जातिगुणकर्मगतानां सत्तारूपत्वकर्मत्वादीनां ग्रहणं, तदा तेषामपि परम्परया तादात्म्यसंभवात् संयुक्ततादात्म्यमेव सन्निकर्ष इति मन्यामहे। यहा यथा परे रूपत्वादिग्रहणाय संयुक्तसमवेतसमवायमाश्रयन्ते, तथास्माकमपि संयुक्ततदात्मतादात्म्यं नाम तृतीयः सन्निकर्षोऽस्तु। का हानिः।

जातिगुणकर्मणां च स्वाश्रयैस्तादात्म्यमेव सम्बन्ध इति पश्चात् साधयिष्यते। तस्माद् द्वेधा त्रेधा वा सन्निकर्षः । तार्षिकाः पुनस्तादात्म्यस्थाने सभवाय नभिषिञ्चन्तोऽन्यथा सन्निकर्षमाहुःसंयोगः, संयुक्तसनवायः, संयुक्तप्तमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति षोढा सन्निकर्षः । तत्र चक्षुरादिभिः संयोगाद् द्रव्याणां ग्रहणम्। चक्षुरादिसंयुक्ते द्रव्ये समवायाद् गुणादीनां ग्रहणम्। संयुक्ते द्रव्ये समवेतेषु गुणादिपु समवायाद् गुणत्वादीनां ग्रहणम्। शब्दस्य चाकाशगुणत्वादाकाशात्मकेन श्रोत्रेण समवायाद् ग्रहणम्। शब्दत्वादीनां तु श्रोत्रसमवेते शब्दे समवायाद् ग्रहणम् । अभावस्य तु भावधर्मभूतयोः संयोगसमवाययोरभावात् संयुक्तभूतलादिविशेषणविशे यरूपसन्निकर्षण ग्रहणम्। तथैव समवायस्याप्यद्रव्यत्वेन संयोगाभावात् समवायान्तराश्रयणेऽनवस्थाप्रसङ्गाद् विशेषणविशेष्यभाव एव सन्निकर्ष इति।

तत्राद्यं त्रितयं तावन्नाममात्रेण भिद्यते।

समवायादयस्त्वन्ये सन्निकर्षा निराश्रयाः ॥ ८॥

शब्दस्य हि श्रोत्रगुणत्वाभावात् समवायाख्यः समवेतसमवायाख्यश्च सन्निकर्षो निरवकाशः । अभावस्य च प्रत्यक्षत्वाभावात् समवायस्य च शशशृङ्गायमाणत्वाद् विशेषणविशेष्यभावसन्निकर्षोऽपि हेयः । किञ्च चक्षुःसंयुक्तेनार्थेनाभावसमवाययोर्विशेषणविशेष्यभावो न सम्भवति । दण्डी पुरुष इत्यादौ सम्बन्धान्तरपूर्वकस्यैव विशेषणविशेष्यभावस्य दर्शनाद्, अभावसमवाययोश्चार्थेन सम्बन्धान्तराभावादिति । प्राभाकरास्तु संयोगः, संयुक्तसमवायः, सनवायः इति त्रेधा सन्निकर्षमाहुः । तन्मते रूपत्वादीनामभावात् संयुक्तसमवेतसमवायो नाश्रयणीयः, शब्दत्वस्याभावात् समवेतसमवायोऽपि । अभावस्य चाभावात् समवायस्य च प्रत्यक्षत्वाभावाद् विशेषणविशेष्यभावोऽपि नाश्रय गीय इति । तदपि मतं रूपत्वादीनां साधनात् तार्किकैरेव निराकृतम् । तस्मादुक्ताकार एव सन्निकर्ष इति ।

तच्चेन्द्रियसन्निकर्षजं ज्ञानं द्विविधं निर्विकल्पकं सविकल्पकं चेति । तत्रेन्द्रिय सन्निकर्षानन्तरमेव द्रव्यादिस्वरूपमात्रावगाहि शब्दानुगमशून्यं यत् सम्मुग्धज्ञानं जायते, तद् विशिटकल्पनाभावाद् निर्विकल्पकभित्युच्यते । यत्तु तदनन्तरं शद्धसरणसहकृतं जात्यादिविशिष्टवस्तुविषयं रक्तो.यं घटोऽगनिसादिव्य विज्ञानं, तत् सविफलाम् । तत्र शाब्दिका निर्विकल्पकं नास्तीत्याहुः । तदुक्तं- "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।" (वाक्यप. का. १. श्लो. १२४) इति । तइयुक्तम् । पूर्वमर्थदर्शनाभावे शब्दस्मरणस्य हेत्वभावप्रसङ्गात् । सौगतास्तु निर्विकल्पकमेव प्रत्यक्षमाश्रित्य सविकल्पकस्य प्रमाणत्वं प्रत्यक्षलं च नास्तीत्याहुः । तदप्ययुतन। तस्य प्रत्यक्षतया लोकासिद्धस्य निषेधे लोकविरोधात् । तदुक्तं-

"चन्द्रशब्दाभिधेयत्वं शशिनो यो निषेधति ।

स एव सविकल्पस्य प्रत्यक्षत्वं निवारयेत् ॥"

इति । किञ्च सविकल्पकानन्तरमेवार्थक्रियादर्शनात् तस्यार्थक्रियाकारित्वलक्षणं प्रमाणत्वं दुर्निवारम् । नन्वर्थक्रियाकारित्वमस्यार्थतोऽतिविप्रकर्षाभावाद् दैवागतमेव । न स्वाभाविकम् । वस्तुतस्त्वयं विकल्पो मिथ्या, अवस्तुभूतसामान्यादिविषयत्वादिति चेत् । मैवम् । अनुमानविकल्पस्याप्यप्रामाण्यप्रसङ्गात् सामान्यादेर्वस्तुत्वस्य साधयिष्यमाणत्वाच्च । अतः प्रमाणमेव सविकल्पकम् । ननु तथापि कथमस्य प्रत्यक्षशब्दवाच्यत्वं, निर्विकल्पकव्यवधानेन साक्षादक्षजत्वाभावात्, परम्परयाक्षजस्य प्रत्यक्षत्वेऽनुमानादीनामपि प्रत्यक्षत्वप्रसङ्गात् । मैवम्। पङ्कजादिष्विव योगरूढिस्वीकारेणानुमानादिषु प्रत्यक्षशब्दस्याप्रवृत्तेः । अत्र गुरुराह-न पङ्कजादिषु रूढिरस्ति, अवयवशक्त्यैव पद्मे वृत्त्युपपत्तेः । कुमुदादिष्वेप्रवृत्तिस्तु तेष्वप्रयोगादेव भविष्यतीति । तदयुक्तम् । पङ्कजशब्दस्य पद्मे वृत्तौ का सामग्रीति चिन्तायां योगमात्रस्य कुमुदादिष्वपि सद्भावेन व्यभिचाराद् रूढिरपि सामग्रीत्वेन कल्प्या। योगश्च प्रतीतो न हातुं शक्य इत्युभयसिद्धेः । तस्माद् योगरूढिशक्त्या निर्विकल्पकसविकल्पकयोरेव प्रत्यक्षशब्दवाच्यत्वं नाक्षापेक्षाणामप्यनुमानादीनामिति सिद्धम् । सविकल्पकेन च द्रव्यजातिगुणकर्मनामाभिः पञ्चधा विकल्पो भवति । यथा वेणुमानयं, गोपोऽयं, श्यामोऽयं, गायत्ययं, गोविन्दोऽयमिति । प्रत्यभिज्ञाप्रत्यक्षमपि षष्ठो विकल्प इति केचित् । तन्न । नामकल्पनायामन्तर्भावात् । नाम्ना हि पूर्वमनुभूतरूपे स्मारिते तद्रूपविशिष्टतयार्थस्य कल्पना नामकल्पनेत्युच्यते । तेन गोविन्दोऽयमित्यस्यायमर्थः-योऽसावस्माभिर्गोविन्दशब्दवाच्यतया पूर्वं गृहीतः, स एवायमिति । यदा तु शब्दवाच्यत्वमतन्त्रीकृत्य पूर्वापररूपयोक्यावगम एव तात्पर्यं, तदा स एवायमिति प्रत्यभिज्ञा स्पष्टा भवति । सा च प्रत्यभिज्ञा संस्कारसहितेनेन्द्रियेणैकज्ञानत्वेन जन्यते । तया च म इति अयमिति च हे भाने जन्येते । तत्र स इति भानजननशक्तिः संस्कारकृता । अयमिति भानजननशक्तिरिन्द्रियकृता इत्यलमनेन । इह च प्रत्यक्षज्ञानेषु विवक्षाभेदेनेन्द्रियस्य तत्सन्निकर्षज्ञानस्य वा करणत्वं भवति । अतः सिद्धेमिन्द्रियसन्निकर्षजं प्रमाणं प्रत्यक्षमिति । गुरुस्त्वाह-साक्षात्प्रतीतिः

प्रत्यक्षम्। त(द्) मेयमातृप्रमास्विति त्रिपुटं भवतीति। तत्र किमिदं साक्षात्त्वं नाम। ननु साक्षाद्धीः स्वरूपधीः। अक्षाद्धि स्वेनैव रूपेण भानम् । लिङ्गादिभ्यस्तु परसम्बन्धिरूपेणैवाग्न्यादीनां भानादसाक्षात्त्वमिति चेत्, तर्हि नामादिपरसम्बन्धिरूपेणं भानात् सविकल्पकस्यासाक्षात्त्वं स्यात् । अथ तत्र परसम्बन्धिरूपभाने सत्यपि स्वरूपधीरप्यस्तीत्युच्यते, तनुमानादिष्वपि तथाभावात् साक्षात्त्वं स्यात् । आत्मस्वात्मनोस्तु सर्वज्ञानेषु प्रत्यक्षत्वकथनं निराकरिष्याम इत्यास्तामेतत् । कल्पनापोढमभ्रान्तं प्रत्यक्षमिति बौद्धाः। कल्पनापोढपदेन विकल्पानां निरासः, अभ्रान्तपदेन निर्विकल्पकेऽपि भ्रमत्वेनाभिमतानां केशोण्डुकादिज्ञानानामिति। तदपि सविकल्पकस्य प्रत्यक्षत्वसाधनादव्याप्तमिति । यत् पुनर्भूतभविष्यदादिविषयं योगिज्ञानमीश्वरज्ञानं चेन्द्रियसन्निकर्षजत्वाभावेऽप्यपरोक्षमस्तीति तत्सङ्ग्रहणायापरोक्षप्रमाव्याप्तं प्रत्यक्षमिति लक्षयितव्यमिति तार्किकैरुक्तम् । तदप्ययुक्तम्। प्रत्यक्षस्य विद्यमानोपलम्भत्वनियमाद् भूतादीनां प्रत्यक्षत्वस्यानुपपत्तेः। तस्मादस्मदुक्तं प्रत्यक्षलक्षणं रमणीयम्।

इन्द्रियव्यतिरिक्तानि द्रव्याण्येषां च जातयः।

प्रायश्च गुणकर्माणि प्रत्यक्षाणीति वक्ष्यते॥ ९॥

इति मानमेयोदये प्रमाणपरिच्छेदे प्रत्यक्षपरीक्षा।

## अनुमानपरीक्षा

अथानुमानपरीक्षा।

व्याप्यदर्शनादसन्निकृष्टार्थज्ञानमनुमानम् । यथा पर्वते धूमवत्त्वदेर्शनादग्निमत्त्वज्ञानम्। किमत्र धूमस्य व्याप्यत्वम्। उच्यते। यद् यतो बहिर्न

वर्तते, तत् तस्य व्याप्यम् । धूमश्च । दहनादन्यत्र न वर्तत इति धूमस्य व्याप्यत्वम् । दहनस्तु धूमादन्यत्रापि वर्ततेऽङ्गारावस्थायामिति तस्य व्यापकत्वमेव। तदियमग्निधूमयोरन्योन्यव्याप्त्यभावाद् विषमव्याप्तिः। क्वचित् तु समव्याप्तिरप्यस्ति यथा कृतकत्वानित्यत्वयोः। तत्र खलु कृतकानां सर्वेषामनित्यत्वमस्ति । अनित्यानां सर्वेषां कृतकत्वमप्यस्तीति समव्याप्तिरेव । का पुनरियं व्याप्तिः । उच्यते । स्वाभाविकः सम्बन्धो व्याप्तिः । स्वाभाविकत्वं चोपाधिराहित्यम् । उपाधिरिति च साध्यस्य साक्षात्प्रयोजकं हेत्वन्तरमुच्यते । तत्सद्भावे हि तदत्तमेव साध्यसम्बन्ध कचिल्लभमानः प्रस्तुतो हेतुः स्वयमेवासाधको भवति । तद् यथा 'अग्नीषोमीयहिंसा अधर्मः, हिंसालाद्, बाह्यहिंसादिवदित्यवैदिकानां साङ्ख्यानां च प्रयोगः। तत्र निषिद्धत्वमुपाधिः । तदेव ह्यधर्मवस्य साक्षात्प्रयोजकम् । बाह्यहिंसानामपि च निषिद्धत्वकृतमेवाधर्मत्वमिति क्रतुहिंसायाँ निषिद्धत्वाभावे हिंसात्वमात्रेणाधर्मत्वं न सिध्यतीति । साधनाव्यापकत्वे सति साध्यसमव्याप्त उपाधिरिति तस्य लक्षणम् । निषिद्धत्वं हि साधनभूतहिंसात्वदेशे सर्वत्र न वर्तते, क्रतुहिंसायां निषिद्धत्वाभावात् । साध्यभूतेन चाधर्मत्वेन निषिद्धत्वस्य समव्याप्तिरस्ति, निषिद्धानां सर्वेषामप्यधर्मत्वाद् , अधर्मभूतानां च सर्वेषां निषिद्धत्वादिति । तत्सामग्रीकत्वं महानसत्वं पर्वतान्यत्वं चाग्न्यनुमितावुपाधिर्मा भूदिति तद्विशेषणत्रितयम्। अत्र यदि साध्यसमव्याप्त उपाधिरित्येवोच्येत, तर्हि धूमवत्त्वेनाग्निमत्त्वे साध्यमानेऽग्निसामग्रीकत्वमुपाधिः स्यात् । अस्ति हि तस्याग्निना समव्याप्तिः । अतस्तन्निवृत्त्यर्थमुक्तं साधनाव्यापक इति । अग्निसामग्री हि साधनभूतस्य धूमस्य व्यापिकैव, धूमे सति सर्वत्राग्निसामग्र्या अवश्यंभावात् । यदि तु साधनाव्यापक इत्येवोच्येत, तर्हि तत्रैव महानसत्वमुपाधिः स्यात् । न हि धूमे सति सर्वत्र महानसत्वमस्तीति साधनाव्यापकत्वस्य भावात् । अतस्तन्निवृत्त्यर्थ साध्यव्यापकत्वमाश्रयणीयम् । न हि महानसत्वस्याग्निव्यापकत्वमस्ति, मठादिष्वग्निसद्भावेऽपि तदभावात्। अथ यदि साधनाव्यापकत्वे सति साध्यव्यापके उपाधिरित्येवोच्येत, तथापि पर्वतेतरत्वमुपाधिः स्यात् । पर्वतेतरत्वं विनापि पर्वते धूमस्य दर्शनेन साधनाव्यापकत्वात् । अग्निमत्त्वेन पूर्वमवधारितानां सर्वेषामपि पर्वतेतरत्वेन साध्यव्यापकत्वस्यापि. सद्भावात् । अतस्तन्निवृत्त्यर्थ समशब्दः । न हि

तस्याग्निना समव्याप्तिरस्ति, पर्वतेतरेषां सर्वेषामग्निमत्त्वाभावादिति । अन्यत्र वा विशेषणकृत्यं दर्शयितव्यम्। यदि साध्यसमव्याप्त एवोपाधिः स्यात्, तर्हि 'शब्दोऽनित्यः जन्यत्वाद् घटवदित्यत्र सकर्तृकत्वमुपाधिः स्याद्, अनित्यत्वसकर्तृकत्वयोः समव्याप्तिसद्भावात् । अतस्तन्निवृत्त्यर्थमुक्तं साधनाव्यापक इति । सकर्तृकत्वं हि साधनाभिमतस्य जन्यत्वस्यापि व्यापकमिति साधनव्यापकत्वादनुपाधित्वम् । साधनाव्यापकस्यैवोपाधित्वे तु तत्रैव सावयवत्वं घटत्वमित्यादिरुपाधिः किं न स्यात्। न हि जन्यानामपि गुणादीनां सावयवत्वं घटत्वं वास्तीति साधनाव्यापकत्वस्य सद्भावात् । अतः साध्यव्यापकत्वमप्याश्रयणीयम् । सावयवत्वघटत्वादीनां गुणक्रियादावनित्यत्वव्यापकत्वाभावात्। तथापि शब्देतरत्वस्यानित्यत्वव्यापकत्वादुपाधित्वं स्यादिति तन्निवृत्त्यर्थ समशब्द इति। इदं त्वनुमानं व्याप्तिप्रदर्शनमात्रपरमेव । न स्वसिद्धान्तपरमिति वेदितव्यम् । ननु पर्वतेतरत्वाभावेऽप्यग्निरस्ति चेदयं दोषः स्यादिति तर्कस्यासम्भवेन पर्वतेतरत्वस्याग्निव्यापकत्वमेव नास्ति । सत्यम् । तथापि तस्य व्यापकत्वेनावगमादक्लेशेन तन्निरासार्थ समशब्दश्चिदानन्दादिभिराश्रितः।

समव्याप्तिमतामेव सर्वथापि ह्युपाधिता।

इति विस्पष्टतार्थं च समशब्दो न दूषणमें ॥१०॥

अस्य चोपाधेः साध्यव्यापकत्वाद्यनिश्चये शङ्कितोपाधित्वम् । यथा-- मैत्रीतनयत्वेनाष्टमगर्भस्य श्यामत्वे साध्ये शाकाद्याहारपरिणाम उपाधिः। अष्टमपुत्रे च तस्य नास्तित्वे स्थित एव तस्य साधनाव्यापकत्वं भवेत्। स च तत्रापि शङ्कयत एवेत्यनिश्चितमेव साधनाव्यापकत्वम् । अतः शङ्कितोपाधिरसाविति । कचिच्च साधनस्य विशेष एव प्रयोजको भवति। यथा 'अयं द्विजो वेदज्ञो भविष्यति द्विजत्वाद्' इत्यत्र बुद्ध्यादिमविजत्वमुपाधिरिति।

तस्मादुपाधिमिच्छद्भिः पक्षभूमिमनाप्नुवन्।

सपक्षान् व्याप्नुवन् धर्मो मृग्यतामिति सङ्ग्रहः ॥११॥

सोऽयमीदृश उपाधि—मस्याग्निसम्बन्धे नास्तीति खाभाविक एवासौ सम्बन्धः । स पुनः स्वाभाविकः सम्बन्धः कथं गृह्यत इति चेत् । उच्यते । आदौ तावन्महानसादौ भूयो भूयो धूमस्याग्मिसम्बन्धं पश्यन् क्रमेण च महानसत्वगृहत्वग्रामत्वादीनुपाधित्वेनाशङ्कय व्यभिचारदर्शनेन निरस्यन्नन्यानप्युपाधीन निपुणं निरूप्य योग्यानुपलम्भेन निराकुर्वन् भूयोदर्शनोपाध्यभावग्रहणजनितसंस्कारसहितेनेन्द्रियेण सोऽयमेकरूप एव धूमाग्न्योः स्वाभाविकः सम्बन्ध इति निश्चिनोतीति । प्राभाकरास्तुधूमस्याग्निसम्बन्धः सकृद्दर्शनादेवावगम्यत इति सकृदर्शनगम्यैव व्याप्तिः । उपाधिशङ्कानिरासार्थमेव तु भूयोदर्शनमर्थ्यत इत्याहुः । तदयुक्तम् । अनुमानाङ्गभूत एव सम्बन्धो व्याप्तिरित्युच्यते । निरुपाधिकत्वविशिष्टस्यैव च सम्बन्धस्यानुमानाङ्गत्वं, न धूमाग्निसम्बन्धमात्रस्य। निरुपाधिकत्वावधारणं च भूयोदर्शनसाध्यमेवेति तैरप्युक्तम् । अतो भूयोदर्शनगम्यैव निरुपाधिकसम्बन्धरूपा व्याप्तिः । ननु न भूयोदर्शनमात्रेण निरुपाधिकत्वावधारणं, तस्य मैत्रीतनयत्वश्यामत्वयोरपि भावात् । सत्यम् । अत एवाह चिदानन्दः-न केवलं भूयोभिर्दर्शनस्तादृशमवधारणं सिध्यतीति प्रमाणोत्पत्त्यनुगुणस्तर्कोऽपि तत्र सहकारीति । कः पुनस्तर्कः। उच्यते । प्रमाणेन साध्यमानस्यार्थस्यान्यथात्वशङ्कायां तन्निरासार्थमन्यथात्वे दोषकथनं तर्कः । अत एवानिष्टप्रसङ्गस्तर्क इति तार्किकाः । अयमेव च विपक्षे बाधक इति चोच्यते । यथा यद्यत्राग्निर्न स्यात् तर्हि धूमोऽपि न स्याद्' इत्यादि । अस्य च तर्कस्य पञ्चाङ्गानि । यदाहुः- "व्याप्तिस्तर्काप्रतिहतिरवसानं विपर्यये ।

अनिष्टाननुकूलत्वे इति तर्काङ्गपञ्चकम् ॥" इति । अत्र साध्यवैपरीत्यमग्न्यभावादिकमारोप्य तेन लिङ्गभूतेन धूमाभावाद्यनिष्टस्य प्रसञ्जनं हि तर्केण क्रियते । तत्र प्रसञ्जकस्याहार्यलिङ्गस्य प्रसञ्जनीयेन व्याप्तिरेष्टव्या । तथा प्रतितकैरप्रतिघातः। प्रसञ्जनीयविपर्यये पर्यवसानम् , एवं चेदेवं स्याद्, नचैवमिति । प्रसञ्जनीयस्य चानिष्टत्वं प्रसिद्धम् । अननुकूलत्वं प्रतिपक्षासाधकत्वमिति ।

अङ्गवैकल्ये च तर्काभासत्वं भवति। व्याप्त्यभावे यथा 'यद्यग्निमत्त्वं न स्यात् तर्हि पर्वतत्वमपि न स्यादिति । तर्कप्रतिहतौ यथा 'यदीयं मेघोन्नतिवृष्टिमती न स्यात् तर्हि निबिडापि न स्यादिति तर्कस्य 'यदीयं वृष्टिमती स्यात् तर्हि वातोद्रेकवती न स्यादिति तर्केण प्रतिहतिः। विपर्ययपर्यवसानाभावे यथा 'शब्दोऽनित्यः कृतकत्वाद्' इति मीमांसकं प्रति प्रयोगे 'यद्यनित्यो न स्यात् तर्हि कृतकोऽपि न स्यादिति तर्कः । तत्र कृतकश्चायमिति पर्यवसाययितुं न शक्यते, मीमांसकपक्षे शब्दस्य कृतकत्वाभावात् । इष्टत्वमप्यत्रैव, कृतकत्वाभावस्य तं प्रतीष्टत्वात् । अनुकूलत्वे यथा 'अनुमेयं कर्म कमत्वाद् आदित्यकर्मवद्' इत्यत्रान्यथा कमैव न सिध्येदिति तर्कः। स च प्रत्यक्षवादिनामप्यनुकूलः। तैरपि प्रत्यक्षत्वं साधयित्वान्यथा कमैव न स्यादिति वक्तुं शक्यत्वादिति । आत्माश्रयादयश्च दोषास्तर्क एवान्तर्भूताः अनिष्टप्रसङ्गरूपत्वात् ।

स्वेनैव स्वस्य सिद्धिर्या तदात्माश्रयदूषणम् ।

अनेनान्यस्ततश्चायमित्यन्योन्याश्रयं भवेत् ॥ १२ ॥

अनेनान्यस्ततश्चान्यस्ततोऽसाविति चक्रकम् ।

अतीतास्पृष्टमन्यान्यग्रहणं त्वनवस्थितिः ॥ १३ ॥

गौरवं लाघवं चेति तर्कौ सार्वत्रिकावुभौ ।

गौरवं कल्पनाधिक्यं लाघवं त्वल्पकल्पना ॥ १४ ॥

दोषप्रसङ्गरूपत्वं गौरवस्यैव विद्यते ।

साध्ये गुणकथाद्वारा लाघवस्य प्रसङ्गता ॥ १५॥

साध्याभावानुवादेन दोषः साध्ये गुणोऽपि वा।

यत्रानुकूलतर्कोऽसौ साध्यसिद्धावनुग्रहात् ॥ १६ ॥

साध्यस्यैवानुवादेन यदनिष्टप्रसञ्जनम् ।

स तर्कः प्रतिकूलः स्थात् साध्यसिद्धिनिरोधनात्॥१७॥ इति ।

स चायं तर्को व्याप्तिग्रहणवेलायामनुमानोत्थानसमये वा व्यभिचारशङ्कां निरस्य व्याप्तिं शोधयन्ननुमानस्यानुग्राहको भवति । ननु यद्यग्निर्न स्यात् तर्हि धूमोऽपि न स्यादित्यनेनैव तर्केण व्यभिचारशङ्का न निवर्तते, अग्न्यभावेऽपि धूमः किं न स्यादिति शङ्कायाः पुनरप्यनपायात् । सत्यम् । अत एव शङ्काव्याघातपर्यन्तं तर्कमार्गेणैव गन्तव्यमिति तार्किकाः। इह च यद्यग्न्यभावेऽपि धूमः स्यात्, तर्हि कारणं विनापि कार्यजननमङ्गीकृतं स्यादिति तर्के प्रयुक्ते तदपि किं न स्यादिति शङ्का न लोकविदामङ्कुरति । ननु तथापि धूमस्याग्निः कारणमिति कुतो निर्णीयत इति शङ्का नापैति । मैवम् । यद्यग्निः कारणं न स्यात् तर्हि कारणान्तरानुपलम्भन धूमस्य निष्कारणत्वमेव प्रसजेदिति तर्के सति समस्तविजयात् । तदेवं तर्के व्याभिचारशङ्कायां सर्वतो निरुद्धायामुपाध्यन्तरशङ्काकथापि विधूतैव । ततश्चादृश्योपाधिशङ्का सर्वथा दुर्वारेति चार्वाकदुर्वादोऽपि निर्वासित इति ।

अथवोपाधिशकैव तनिष्कास्यते स्फुटम् ।

उपाधिर्मानयोग्यो वा तदयोग्योऽथवा भवेत् ॥ १८॥

अयोग्यश्चेन्न शङ्कथेत योग्यश्चेत् किं न दृश्यते।

अनुमानादिगम्यश्चेल्लिङ्गादिः किं न दृश्यते ॥ १९ ॥ इत्यादि । ततश्च

शङ्काव्याघातपर्यन्तमेवं सर्वानुमास्वपि।

तर्कजालं प्रयोक्तव्यमत्यल्पं चेदमुच्यते ॥ २०॥

यतः प्रत्यक्षशाब्दादिप्रमाणान्यखिलान्यपि ।

तर्कं विना न जीवन्ति प्रत्यक्षे तावदीक्ष्यताम् ॥२१॥

अयं घट इति प्रत्यक्षं हि सुगतकथितपरमाणुगोचरतापराणोदिना तर्केणानुगृहीतमेवावयविगोचरं भवति । यदि परमाणुविषयता स्यात् , तर्हि एकत्वेन महत्त्वेन चावभासो नस्यादिति तर्कः । तथा अयं गौरिति प्रत्यक्षमपि यद्यत्यन्तभिन्नविषयं स्यात् तह-दंगोत्वे इति प्रतीतिः स्यादिति तर्केणानुगृहीतमेवाभेदस्यापि ग्राहकं भवतीत्यादि । एवं शाब्देऽपि ब्रूमः । अध्ययनविधिरेव तावद् यदि स्वर्गफलः स्यात् तर्हि दृष्टार्थत्वे सम्भवत्यदृष्टग्रहणाद् गौरवं स्यादिति तर्कानुग्रहेणार्थज्ञानफलेबोधको भवति । यद्यर्थज्ञानफलः स्यात् तर्हि विधिवैयर्थ्य स्यादिति प्रतिकूलतर्कश्च तत्र तत्र निरसनीयः। तथा

"उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।

सकल्पं सरहस्यं च तमाचार्य प्रचक्षते॥" (मनु. अ. २.श्लो.१४०) इति स्मृतिः।

यद्यध्यापनविधिः स्यात् तर्हि 'तु यो द्विजस्तमाचार्य प्रचक्षत' इत्यंशेनैकवाक्यता न स्यादिति तर्केणाचार्यलक्षणपरता निश्चीयतेऽस्याः स्मृतेः । तथा- 'अक्ताः शर्करा उपदधाती'त्यत्र यदि घृतेनाञ्जनं न स्यात् , तर्हि 'तेजो चै घृतमिति वाक्यशेषो विरुध्यत इति तर्काद् घृताञ्जनपरता साध्यत इति ।

एवं सर्वत्र तर्कौघैरर्थाभासनिरासतः।

वाक्यार्थस्थापनी सर्वा मीमांसा तरूपिणी ॥ २२ ॥

उक्तं च मनुना

"आर्ष धर्मोपदेशं च वेदशास्त्राविरोधिना।

यस्तर्केणानुसन्धत्ते स धर्म वेद नेतरः॥" (अ. १२.श्लो. १०६) इति।

एवमुपमानार्थापत्त्यभावेष्वपि तत्र तत्र तर्कापेक्षणमूहितव्यम्।

तस्मात् सर्वप्रमाणानां तर्कोऽनुग्राहकः स्थितः।

साध्ये विपर्ययाशङ्काविच्छेदस्तदनुग्रहः॥ २३॥

अस्याविज्ञाततत्त्वोऽर्थः सन्दिग्धो विषयो मतः।

हेतुरारोपितं लिङ्गं फलं तत्त्वार्थनिर्णयः॥ २४॥

तदेवं तत्त्वसिद्ध्यर्थमन्यथानिष्टवर्णने।

प्रसरत्यसदारोपतत्साधनपरम्परा॥२५॥

तत्र चारोपवादेऽपि सिद्धान्तत्वभ्रमः क्वचित्।

वेदश्चेदीश्वराधीनस्तहीशोऽपि न सिध्यति॥ २६॥

इत्युक्तावीश्वराभावः सिद्धान्त इति मन्यते।

असम्भाव्यस्य चारोपादसन्तोषः क्वचिद् भवेत्॥२७॥

अपकर्षाप्रतिष्ठश्चेत् परमाणुस्तथासति।

अनन्तावयवारम्भान्मेरुतर्षपयोर्द्वयोः॥ २८॥

स्यात् तुल्यपरिमाण(त्व)मित्याद्युक्तिर्यथा भवेत् ।

तत्र चास्य प्रमाणस्य तर्कोऽयं तस्य सिद्धये ॥ २९ ॥

अन्यदुक्तमिति व्यक्तं विविञ्चन् नैव मुह्यति ।

तस्मात् तर्कप्रकारोऽयं प्रसङ्गप्रापितोऽपि सन् ॥ ३०॥

अत्यन्तमुपकारीति विस्तरात् प्रस्तुतो मया ॥ ३०१ ॥ इति । तदेवं तर्कसहायेन भूयोदर्शनेनैव निरुपाधिकसम्बन्धोविधार्यते ।

भूयोदर्शनतः शक्या दृश्योपाधिनिराक्रिया।

अदृश्योपाधिशङ्का तु तरेव निरस्यते ॥ ३१३ ॥ इति विभागः । अतः सिद्धा व्याप्तिः । बौद्धास्तु तादात्म्यतदुत्पत्तिभ्यामेव व्यातिसिद्धिरित्याहुः । यथा-- शिंशपात्वस्य वृक्षत्वेन व्याप्तौ तादात्म्यं, धूमस्याग्निना व्याप्तौ तदुत्पत्ति. रिति । तन्न । कृत्तिकोदयरोहिण्यासत्त्योाप्तौ तदुभयाभावात् । तस्माद् निरुपाधिकत्वावधारणादेव व्याप्तिसिद्धिः ।

व्याप्तिर्नियमः प्रतिवन्धोऽव्यभिचारस्तथाविनाभावः।

व्याप्यं पुनर्नियम्यं गमकं लिङ्गं च साधनं हेतुः ॥३२॥

इत्युभयोः पर्याया इति तस्य तु दर्शनं त्रिविधम् ॥३३॥

व्याप्तिग्रहणवेलायां धूमदर्शनं प्रथमम् । पर्वतोपान्तगतस्य धूमदर्शनं द्वितीयम् । ततश्च व्याप्तिस्मरणानन्तरं तादृशो धूमोऽत्रास्तीति यदनुसन्धानं, तत् तृतीयम् । तदत्र व्याप्यदर्शनमभिमतं, तदनन्तरमेव वह्निज्ञानस्योत्पत्तेरिति । असन्निकष्टपदेन पुनः

किमुच्यते । अपरिच्छिन्नमिति ब्रूमः । तदुक्तम्___ "असन्निकृष्टवाचा च द्वयमत्र जिहासितम्

ताद्रूप्टोण परिच्छित्तिस्तद्विपर्ययतोऽपि वा ॥" इति। पूर्व सत्त्वेन परिच्छिन्ने ह्यग्न्यादौ पुनरनुमानमनुवादः स्याद्, असत्त्वेन परिच्छेदे च बाधितत्वेनाप्रामाण्यमेवेति तदुभयनिवतनार्थमसन्निकृष्टपदमिति । अत्र चार्वाकाः- अग्निविशेषस्यानुमेयत्वे व्याप्त्यसिद्धिः। अग्निसामान्यस्यैव धूमसामान्येन व्याप्तेः। सामान्यस्यानुमेयत्वे तु तस्य पूर्वमेव परिच्छिन्नत्वात् सिद्धसाध्यत्वम्। तथाचासन्निकृष्टपदमप्ययुक्तम्। तदुक्तम् -

"अनुमाभङ्गपङ्केऽस्मिन् निमग्ना वादिदन्तिनः।

विशेषेऽनुगमाभावः सामान्य सिद्धसाध्यता ॥"

इति। अत्रोच्यते। न तावत् सामान्ययोरेव केवलयोाप्तिसिद्धिः। तथाहि सति धूमत्वेन वह्नित्वं स्वतः सम्बद्धमिति व्याप्तिग्रहः स्यात्। तथाच वह्नित्वजातिसम्बन्धाद् धूमत्वमेव वह्निः स्यात्। अतो विशेषद्वारेणैव सामान्ययोर्व्याप्तिः सिध्यति। विशेषश्च तत्र तत्र विभिन्नत्वान्न नियतो निरूपयितुं शक्यत इत्यनियतविशेषालिङ्गितयोर्व्याप्तिरिति स्थितिः । ततश्च पर्वतवतितया दृष्टो धूमोऽनियतविशेषालिङ्गितमग्निं पर्वतेऽनुमापयति । इह च यद्यप्यनियतविशेषालिङ्गितमग्निसामान्य व्याप्तिवेलायामेव गृहीतं, तदेव चानुमेयं, तथापीदानी पर्वतेऽग्निरस्तीति देशकालविशेषस्याप्यनुमीयमानत्वात् तस्य च पूर्वमप्राप्तत्वात् सिद्धसाध्यत्वस्यानवकाश एव।

व्याप्तिश्च पक्षधर्मत्वमनुमाङ्गं द्वयं विदुः।

व्याप्त्या युक्तप्रकारेण वह्निसामान्यवेदनम्॥ ३४॥

धूमस्य शेलनिष्ठत्वरूपा या पक्षधर्मता।

तया पर्वतसम्बन्धो वह्नेरप्यवगम्यते ॥ ३५॥

इति । गुरुस्त्वाह-धूमवतो देशस्य वह्निमत्त्वमप्यस्तीति व्याप्तिवेलायामेव गृहीतत्वाद् धूमवत्त्वमेव पर्वतस्येदानीमपूर्व ग्रहीतव्यम् । अग्निमत्त्वंतु तस्य पूर्वगृहीतमेवावगम्यत इति। तदयुक्तम्। धूमवत्त्वं तावत् पर्वतस्येदानीमेव गृह्यत इत्युक्तम् । अतः कथं धूमवत्त्वप्राप्तिं विनात्र वह्निमत्त्वप्राप्तिः पूर्वमासीदित्यविचारयतो गुरोरयमुन्माद इति । अतः सिद्धमसन्निकृष्टज्ञानस्यानुमानत्वम् । अत्र च प्रमाणोक्तप्रकारेण प्राकट्यरूपानुमितिकरणत्वादेव ज्ञानस्यानुमानत्वमुक्तम् । ज्ञानरूपानुमितिकरणत्वाच्च धूमादेरप्यनुमानत्वमस्त्येवेति । तच्चानुमानं त्रिविधम् अन्वयव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति । द्वेधा हि व्याप्तिः अन्वयव्याप्तिर्व्यतिरेकव्याप्तिश्चेति । तत्र साधनस्य सद्भावे साध्यस्यापि सद्भावोऽन्वयव्याप्तिः। साध्यस्याभावे साधनस्याप्यभावो व्यतिरेकव्याप्तिः। व्यतिरेके च व्याप्यव्यापकभावोऽन्वयाद् विपरीतो भवति। अग्न्यभावो ह्यत्र व्याप्यः। धूमाभावश्च व्यापक इति।

अग्नेर्भावस्य भूयस्त्वात् तदभावोऽल्पतां व्रजेत्।

धूमभावस्य चाल्पत्वात् तदभावो महत्तरः ॥ ३६॥

इति वैपरीत्यस्योपपत्तिः। तत्र यस्योभयविधा व्याप्तिरस्ति तदन्वयव्यतिरेकि। यथा धूमानुमानादि । तत्र हि धूमस्याग्न्यन्वयो महानसादौ दृश्यते । अग्न्यभावे धूमाभावश्च महाहदादौ दृश्यते। तेनान्वयव्यतिरेकित्वम्। यस्य पुनरन्वयव्याप्तिरेवास्ति, तत् केवलान्वयि। यथा-- ज्ञानं ज्ञानान्तरप्रकाश्यं वस्तुत्वा. . द् घटवदित्यादि। अत्र हि ज्ञानप्रकाश्यत्वाभावे वस्तुत्वाभावो न क्वचिदपि दर्शयितुं शक्यः, सर्वेषामप्यर्थानां ज्ञानप्रकाश्यत्वात्। अतो व्यतिरेकव्याप्त्यभावः। यस्य तु व्यतिरेकव्याप्तिरेवास्ति, तत् केवलव्यतिरेकि। यथा-सर्व ज्ञानं स्वप्रकाशं ज्ञानत्वाद, यस्य स्वप्रकाशत्वं नास्ति तस्य ज्ञानत्वमपि नास्ति, यथा घटस्येति। अत्र हि यस्य स्वप्रकाशत्वं तस्य ज्ञानत्वमप्यस्तीति

कचिद् दर्शयितुमशक्यत्वादन्वयव्याप्तिर्नास्ति । स चायं केवलव्यतिरेकी हेतुरावीतहेतुरिति चोच्यते।

तं च कौमारिलाः प्रायो नेच्छन्ति व्यतिरेकिणम्।

तत्स्थाने चाभिषिञ्चन्ति पञ्चमी प्रमितिं पुनः॥३७॥

क्वचित् प्रसिद्धमन्यत्र साध्यते ह्यनुमानतः।

स्वप्रकाशत्वधर्मो हि सिद्धो नान्यत्र कुत्रचित्॥ ३८॥

तेन तत्साधने पक्षो ह्यप्रसिद्धविशेषणः।

एवञ्च दुष्टपक्षोऽयं व्यतिरेकी निवार्यताम्॥ ३९॥

यच्चानुकूलतर्के सत्यप्रसिद्धविशेषणः।

न दोष इति भाषन्ते तार्किकास्तदसङ्गतम्॥ ४०॥

तर्को हि नाप्रसिद्धार्थं क्वचित् साधयितुं क्षमः।

अतोऽप्रसिद्धतादोषस्तर्के सत्यपि दुस्त्यजः॥४१॥ इति।

ननु वेद्यत्वं क्वचिदत्यन्तं नास्ति धर्मत्वाद् यथा घटत्वं पटादिष्वित्यनेने प्रमाणेन वेद्यत्वंविरहरूपे स्वयंप्रकाशत्वे सामान्यतः प्रसिद्ध पुनर्विशेषेण पक्ष साध्यत इति नाप्रसिद्धविशेषणत्वं पक्षस्य। तदुक्तं-

"सामान्यतोऽनुमानेन प्रसिद्धेऽपि विशेषणे।

कथं कथय पक्षोऽयमप्रसिद्धविशेषणः ॥" इति। अस्तु वा तयेवम्।

अत एव चिदानन्दः केवलव्यतिरेकिणम्।

नैव साक्षान्निराचके नापि साक्षानुपाददे ॥ ४२ ॥

तस्मात् सामान्यतः सिद्धिहीनाश्चेद व्यतिक्रिणः ।

सर्वथा वारणीया इत्येतत् तावद व्यवस्थितन् ॥४३॥

इह च स्वप्रकाशत्वे नास्ति सामान्यतोऽनुमा।

वस्तुत्वादेहि धर्मस्य नात्यन्तं नास्तिता क्वचित् ॥४४॥ इति ।

अत्र चान्वयव्यतिरेकिहेतोः पञ्च रूपाणि --- पक्षधर्मत्वं, सपक्षे सत्त्वं, विपक्षाद् व्यावृत्तत्वम् , अबाधितविषयत्वम्, असत्प्रतिपक्षत्वं चेति । तत्र जिज्ञासितसाध्यः पर्वतादिः पक्षः । तन्निष्ठत्वं हेतोः पक्षधर्मत्वम् । निश्चितसाध्यो महानसादिः सपक्षः। तत्र वर्तमानत्वं सपक्षे सत्त्वम् । निश्चितसाध्याभावो महादादिविपक्षः । तत्रावर्तमानत्वं विपक्षाद् व्यावृत्तिः। साध्यस्याबाधितत्वमबाधितविषयत्वम् । प्रतिहेत्वभावोऽसत्प्रतिपक्षत्वमिति । केवलान्वयिनस्तु विपक्षाद् व्यावृत्तिर्नास्ति, विपक्षाभावात् । अतस्तस्य चत्वारि रूपाणि । केवलव्यतिरेकिणः सपक्षे सत्त्वं नास्ति, सपक्षाभावात् । यदि तु सपक्षे सत्यपि पक्षमात्रवृत्तिहेतुः स्यात्, तीसाधारणो नाम हेत्वाभास एव स्यात् । यथा 'नित्या भूः गन्धवत्त्वादिति । अत्र हि नित्यत्वेन सपक्षभूतानामाकाशादीनां सद्भावेऽपि भूमात्रवृत्ति गन्धवत्त्वम् । अतोऽसति सपक्षे पक्षमात्रवृत्तिः केवलव्यतिरेकीति लक्षयन्ति तार्किकाः।

पक्षमात्रस्थितं सिध्येत् पक्षमात्रस्थहेतुना ।

अन्यत्र स्थितमाक्रष्टुं तद्गतस्यैव पाटवम् ॥४५॥ इति ।

अतः सपक्षे सत्त्वाभावाच्चतूरूप एव व्यतिरेकी ।

तत् सिद्धं दैविध्यं त्रैविध्यं चानुमानस्य ॥ ४५ ॥

तञ्च पुनरपि द्वेधा दृष्टं सामान्यतो दृष्टं चेति। तत्र

दृष्टैकव्यक्तिविषयं दृष्टमिष्टं हि मादृशाम्।

कृत्तिकोदयमालक्ष्य रोहिण्यनुमितियथा ॥ ४६ ॥

एवं सामान्यतो व्याप्तिदृष्ट्या यत्रानुमीयते।

सद्भि सामान्यतो दृष्टं यथा वह्न्यनुमादिकम् ॥ ४७ ॥

तार्किकादयस्तु- प्रत्यक्षयोग्यार्थविषयमग्न्याद्यनुमानं दृष्टम्, अतीन्द्रियार्थविषयं चक्षुराद्यनुमानं सामान्यतो दृष्टमित्याहुः । तदयुक्तम् । अतीन्द्रियार्थानामनुमातुमशक्यतया चक्षुरादीनामप्यर्थापत्त्यैव साध्यमानत्वात्। तथाहि

- व्याप्तेरिति शेषः।

व्याप्त्येकशरणं तावदनुमानमिति स्थितम्।

तद् व्याप्तिदर्शितान्मार्गाच्चलितुं क्षमते कुतः॥ ४८ ॥

ततश्च व्यातिविज्ञाने यादृशं वस्तु दृश्यते।

ताडगेवानुमातव्यं यथोष्णो भास्वरोऽनलः ॥ ४९ ॥

न चातीन्द्रियवस्तूनां प्राग्दृष्टाकारयोगिता ।

दृश्यत्वं तेजसां दृष्टं चक्षुषस्तदसम्भवात् ॥ ५० ॥

अत एव हि सर्वत्राप्यत्यन्तादृष्टसाधने ।

विशेषबाधकं नाम दोषं घोषयितास्महे ॥ ५१ ॥

तस्माद् रूपादिसन्दर्शनान्यथानुपपत्तितः।

चक्षुराद्याः प्रसाध्यन्ते न तेष्वनुमितिर्मता ॥ ५२ ॥ इति ।

तच्चानुमानं स्वार्थपरार्थभेदेनापि द्विविधमाहुः । यत्र स्वयमेव धूमादिकं दृष्ट्वा व्याप्त्यादिनिरूपणेनानुमीयते, तत् स्वार्थम् ।

यदा पुनः स एवार्थः परवाक्येन बोध्यते ।

तदा परार्थमित्याहुस्तयोरेतावती भिदा ॥ ५३ ॥

तत्र परार्थानुमानवाक्यं पञ्चावयवमिति तार्किकाः । प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः । यथा - अयं पर्वतोऽग्निमान् , धूमवत्त्वाद्, यो यो धूमवान् स सोऽग्निमान् यथा महानसः, धूमवांश्चायं, तस्मादग्निमानेवेति । अत्र परं बोधयितुं पक्षवचनं प्रतिज्ञा पर्वतोऽग्निमानिति । साधनत्वावेदकं लिङ्गवचनं हेतुः धूमवत्त्वादिति । व्याप्तिप्रदर्शनपुरस्सरं दृष्टान्ताभिधानमुदाहरणं यो यो धूमवान् स सोऽग्निमान् यथा महानस इति । सिद्धव्याप्तिकस्य पक्षे उपनयनमुपनयः धूमवांश्चायमिति । सहेतुकं पक्षस्य पुनर्वचनं निगमनं तस्मादग्निमानिति । अत्र ब्रूमः-

प्रतिज्ञया निगमनं हेतुनोपनयस्तथा ।

गतार्थ इति कः कुर्यात् पञ्चावयवघोषणाम् ॥ ५४ ॥

तस्मात् त्र्यवयवं ब्रूमः पौनरुक्तयासहा वयम् ।

उदाहरणपर्यन्तं यद्वोदाहरणादिकम् ॥ ५५ ॥

सौगतास्त्वाहुः -- यो धूमवान् सोऽग्निमान् यथा महानसः, धूमवांश्चायमित्येतावदुक्तौ तस्मादग्निमानित्यर्थात सिध्यति । अत उदाहरणोपनयौ हावेवावयवाविति। तदपि साध्यांशेऽध्याहारदोषप्रसङ्गादपास्तम् ।

तदेवं पौनरुक्त्येन तथाध्याहारदोषतः ।

तर्कबौद्धमते हित्वा वयं व्यवयवे स्थिताः ॥ ५६ ॥

तत्रोदाहरणान्तं यथा ---- पर्वतोऽग्निमान् , धूमवत्त्वाद् , यो धूमवान् सोऽग्निमान् यथा महानस इति । उदाहरणादिकं यथा-- यो धूमवान् सोऽग्निमान् यथा महानसः, धूमवांश्वायं, तस्मादग्निमानिति ।

अथ प्रतिज्ञाहेत्वोश्च दृष्टान्तस्य च दूषणम् ।

क्रमेण कथ्यतेऽस्माभिर्यद् वेद्यं वादिनां पुरः॥ ५७॥

तत्र परप्रतिपादनार्थं पक्षवचनं हि प्रतिज्ञा । जिज्ञासितधर्मविशिष्टश्च पक्ष इत्युक्तम् । ततश्च तद्रूपपरिच्छेदात् तद्विपरीतपरिच्छेदाद् वान्यत्राप्रसिद्धत्वाद् वा यो न जिज्ञासितो धर्मस्तद्विशिष्टस्य न पक्षत्वमिति सिद्धविशेषणो बाधितविशेषणोऽप्रसिडविशेषणश्च पक्षाभास एवेति तदावेदकं वचनमपि प्रतिज्ञाभास एव । तद् यथा -- वह्निरुष्ण इति सिद्धविशेषणः। वह्निरनुष्ण इति बाधिताविशेषणः । क्षित्यादिकं सर्वज्ञकर्तृकमित्यप्रसिद्धविशेषणः, घटादिषु कचिदपि सर्वज्ञकर्तृकत्वस्यासिद्धत्वात्। बाधकप्रमाणभेदेन बाधितविशेषणत्वावान्तरविशेषो द्रष्टव्यः । तत्र वह्निरनुष्ण इति प्रत्यक्षबाधः पूर्वमुक्तः । अनुमानस्यापि यदा प्रबलत्वं स्पष्टं

भवति, तदानुमानबाधः । यथा 'मन इन्द्रियं न भवति अभूतात्मकत्वाद् दिगादिवदिति । अत्रेन्द्रियत्वेन मनसोऽनुमीयमानत्वान्मनोधर्भिग्राहकेणैवानुमानेन तस्यानिन्द्रियत्वं बाधितम् । एवं शीघ्रभाविनामनुमानानां सर्वत्र बाधकत्वं द्रष्टव्यम् । शाब्दबाधो यथा --- यागादयः स्वर्गसाधनं न भवन्ति क्रियात्वाद् गमनवादिति । अत्र 'स्वर्गकामो यजेते'त्यादिवाक्यैर्यागादेः स्वर्गसाधनत्वबोधनात् तदभावःशाब्दबाधितः। यथा वा-स्पृश्यं नरास्थि प्राण्यङ्गत्वात् शङ्खवदिति । 'गौर्गवयसदृशो न भवति प्राणित्वात् पुरुषवदित्यत्रोपमानबाधः। 'देवदत्तो बहिर्नास्ति तत्रादृश्यमानत्वादि'त्यत्रार्थापत्तिबाधः, अर्थापत्त्या बहिर्भावस्य साध्यमानत्वात् । 'रूपवान् वायुः द्रव्यत्वात् पृथिवीवदि'त्यत्रानुपलम्भबाधः । अन्येऽपि प्रतिज्ञादोषाः सन्ति ।

यावज्जीवमहं मौनीत्युक्तौ हि स्वोक्तिबाधनम् ।
नेन्दुश्चन्द्रागिरा वाच्य इति लोकविरुद्धता ॥ ५८ ॥

शब्दादेः प्रागनित्यत्वमुक्तं येनैव तेन तु।
नित्यत्वे पुनरुक्ते स्यात् पूर्वसञ्जल्पबाधनम् ॥ ५९॥ इति ।

व्याप्तः साधनधर्मो हेतुः । असिद्धो विरुद्धोऽनैकान्तिकोऽसाधारणश्चेति चत्वारस्तदाभासाः। तत्रासिद्ध उच्यते ।

हेतोळप्तिमतः पक्षसम्बन्धित्वेन वेदनम् ।
सिद्धिरित्युच्यते हेतुसम्पूर्तिस्तावतैव हि ॥ ६० ॥

तेषामेकतमांशस्याप्यभावे स्यादसिद्धता।

हेतोाप्तेश्च पक्षस्य सम्बन्धस्य ग्रहस्य च ॥ ६१ ॥

तत्र हेतुस्वरूपस्यैवासिद्धौ स्वरूपासिद्धः । यथा 'बुद्धो मोहरहितः सर्वज्ञत्वादि'त्यत्र सर्वज्ञत्वं नाम नास्माकं क्वचित् सिद्धम् । अस्य विशेषणासिद्धो विशेष्यासिद्ध इति च द्वौ भेदौ भवतः । आद्यो यथा 'बुद्धो धर्मोपदेष्टा सर्वज्ञत्वे सति शरीरित्वादिति , अन्यस्तु 'शरीरित्वे सति सर्वज्ञत्वादिति । व्याप्त्यभावे व्याप्यत्वासिद्धः । यथा-क्रतुहिंसा अधर्मः हिंसावादिति । अत्र सोपाधिकत्वाद् व्याप्त्यभावः । पक्षाभावे त्वाश्रयासिद्धः । यथा- गगनकुसुमं सुरभि कुसुमत्वादिति । हेतोः पक्षसम्बन्धाभावे सम्बन्धासिद्धः । यथा-शब्दोऽनित्यः चाक्षुषत्वादिति । यस्य तु पक्षैकदेशे सम्बन्धो नास्ति, स भागासिद्धः । स एव पक्षव्याप्त्यभावाद् व्याप्त्यसिद्ध इति च कचिदुच्यते । यथा-वेदाः पौरुषेयाः उपाख्यानात्मकलादिति । यदा तु विशेषणस्य विशेष्यस्य वा पक्षसम्बन्धो नास्ति, तदा विशेषणा सिद्धविशेष्यासिद्धौ भवतः । यथा- अनित्यं गगनं जन्यत्वे सति द्रव्यत्वादिति, द्रव्यत्वे सति जन्यवादिति च । यत्र तु विशेषणं व्यावाभावाद् व्यर्थमेवेति सम्बन्धानह भवति, स व्यर्थविशेषणासिद्धः । यथा- घटोऽनित्यः द्रव्यत्वे सति कृतकलादिति । एवं कृतकले सति द्रव्यत्वादिति व्यर्थविशेष्यासिद्धः । यदा तु हेतुः पक्षसम्बन्धित्वेन न प्रयुज्यते, किन्त्वाश्रयान्तरसम्बन्धित्वेन, तदा व्यधिकरणासिद्धः। यथा-- अनित्यो घटः तदणस्य कृतकलादिति । अत्र न घटाश्रितं कृतकत्वं, किन्तु तद्गुणाश्रितमिति व्यधिकरणासिद्धः । यत्रे पक्षाद् व्यतिरेकाभावेन पक्षसम्बन्धित्वं नास्ति, स व्यतिरेकासिद्धः। यथा-- अनित्यं गगनं गगनत्वादिति । अत्र गगनस्वरूपादन्यद् गगनत्वं नाम नास्तीति । एषां स्वरूपादीनामज्ञानेऽज्ञानासिद्धः सन्दिग्धासिद्धो वा भवति । यथादेवदत्तो बहुधनो भविष्यति तद्धेतुभूतादृष्टशालित्वादिति । अत्र तादृशादृष्टेसद्भावे प्रमाणं नास्तीत्यज्ञातत्वम् । एवम् 'अग्निमान् पर्वतः धूमवत्त्वादि'त्यतावत्प्रयोगेऽनुपदर्शितव्याप्तिकत्वाद् व्याप्त्यज्ञानासिद्धः। एवमेव सन्दिग्धविशेषणासिद्धादयोऽप्यज्ञानासिद्धभेदा ऊहितव्याः । तार्किकास्तु-पक्षे हेतुस्व.

रूपाभाव एव स्वरूपासिद्धिरिति सम्बन्धासिद्धस्य स्वरूपासिद्धत्वमाहुः । तदयुक्तम् । सर्वज्ञवाः स्वरूपमेव क्वचिदपि ना. स्ति। चाक्षुषत्वादेस्तु पक्षसम्बन्धमानं नास्तीति पृथक्त्वप्रतीतेः। एते चासिद्धभेदाः यदान्यतरस्यैव वादिनोऽसिद्धा भवन्ति, तदान्यतरासिद्धा इत्युच्यन्ते । तत्र 'बुद्धो मोहरहितः सर्वज्ञत्वादि'त्युक्तोऽस्माकमेवासिद्धः । एवमुभयोरप्यसिहावुभयासिद्धता वेदितव्या । यथा ---- शशो हिंस्रः विषाणित्वादिति । अथ विरुद्धः।

स च बाधक इत्येवं वार्तिके व्यपदिश्यते ।

द्विधा चासौ स्वरूपस्य विशेषस्य च बाधनात् ॥६२ ॥

तत्र साध्यविपरीतव्याप्तः साध्यस्वरूपविरुद्धः । यथा 'शब्दो नित्यः कृतकत्वादिति । अन्न नित्यत्वविपरीतेनानित्यत्वेन व्याप्तं कृतकत्वमिति नित्यत्वं प्रति विरुद्धत्वात् तस्य बाधकं भवति । साध्यविशेषस्य विपरीतेन विशेषेण व्याप्तो विशेषविरुद्धः । यथा 'क्षित्यादिकं सकर्तृकं कार्यत्वाद् घटवदिति । अत्र साध्यस्य क्षित्यादिकर्तुरशरीरित्वं नाम विशेषः । तस्य विपरीतेन शरीरित्वरूपेण विशेषेण व्याप्तं घटादिपु कार्यत्वं दृष्टमित्यशरीरित्वस्य बाधकं भवति ।

अशरीरित्वबाधे च कर्तृमत्तापि बाध्यते ।

प्रत्यक्षात् सशरीरित्वविशेषे बाधिते सति ॥ ६३ ॥

अशरीरित्वमादाय स्थास्यामीति कृतोद्यमा ।

कर्तृमत्ता हि तस्यापि बाधे नश्यनिराश्रया ॥ ६४ ॥

इत्थं साध्यनिरोधित्वादेष दूषणमेव नः ।

तमीदृशमजानमस्तार्किकेभ्योऽयमञ्जलिः ॥ ६५ ॥

सव्यभिचारोऽनैकान्तिकः । विपक्षेऽपि वर्तमान इति यावत् । स एव साधारण इति चोच्यते । यर्थी-अनित्यः शब्दः प्रमेयत्वादिति । अत्र हि प्रमेयत्वं नित्येष्वपि वर्तत इत्यनैकान्तिकम् । यत्र तु विपक्षवृत्तित्वं सन्दिग्धं, स सन्दिग्धानैकान्तिकः । यथा - क्षणिका भावाः सत्त्वादित्यत्राक्षणिकत्वेऽपि सत्त्वस्य बाधाभावाद् विपक्षवृत्तिः शङ्किता भवति । सति सपक्षे पक्षमात्रवृत्तिरसाधारणः। यथा- नित्या भूर्गन्धवत्त्वादिति । केचित् पुनराहुः-- असाधारणोऽप्यनैकान्तिक एव । यथा खल्वन्वयस्य विपक्षेऽपि वर्तनात् प्रमेयत्वस्य व्यभि. चारित्वम् , एवं व्यतिरेकस्यापि स्वस्थानभूतं विपक्षमतिक्रम्य सर्वेषु सपक्षेष्वपि वर्तनाद् गन्धवत्त्वस्यापि व्यभिचारित्वमस्तीति ।

सत्यं किन्त्वन्वयस्यैव स्वस्थानादतिलचनम् ।

व्यभिचारतया ख्यातं क्लिष्टस्त्वदुदितः क्रमः ॥ ६६ ॥

तेन साधारणस्यैव व्यभिचारित्वमीरितम् ।

हेत्वाभासान्तरत्वेन चासाधारण ईरितः ॥ ६७॥

यद्वा त्वदुक्तमार्गेण तस्यापि व्यभिचारतः ।

अनैकान्तिकतैवास्तु नास्माकं काचन क्षतिः ॥ ६८ ॥

तस्मात् त्रेधा चतुर्धा वा हेत्वाभासा व्यवस्थिताः।

पञ्चधा तार्किकाः प्राहुः षोढान्ये तदसङ्गतम् ॥ ६९॥

असिद्धविरुद्धानैकान्तिकप्रकरणसमकालात्ययापदिष्टभेदेन पञ्चधेति तार्किकाः। अप्रयोजकः षष्ठ इति केचित्। अनध्यवासित एव षष्ठ इति भासर्वज्ञः। तत्र प्रतिहेतुमान् हेतुः प्रकरणसमः सत्प्रतिपक्ष इति चोच्यते। यथा - अप्रत्यक्षो वायुः अरूपवत्त्वाद् मनोवत् , प्रत्यक्षो वायुः स्पर्शवत्त्वाद्, घटवदिति । सोऽयमुक्तेष्वेवान्तर्भावयितव्यः। तथाहि-तुल्यबलं विरुद्धहेतुद्वयं तावन्न सम्भवति। तथासति वस्तुनोऽनुमानद्वयबलप्रापितविरुद्धरूपद्वयप्रसङ्गात्। प्रबलदुर्बलयोर्विरोधे दुर्बलस्य प्रबलापहृतविषयत्वेन बाधितविशेषणत्वाभिधं पक्षदूषणमेवेदं, किं हेत्वाभासान्तरकथया । ननु हेत्वोर्विशेषानवगमवेलायामाभिमानिकतुल्यबलत्वसम्भवात् तादात्विकं प्रकरणसमत्वम्। मैवम्। तदापि बाधितविशेषणत्वस्य सन्देहावस्थैव भवतु, न तु जात्यन्तरमन्वेषणीयम्। अन्यथा सन्दिग्धासिद्धादीनामप्यन्य. त्वं स्यादिति। अथवा संशयहेतुरनैकान्तिक इत्यनैकान्तिकस्य लक्षणमाश्रीयते। साधारणधर्मादसाधारणधर्माद् विप्रतिपत्तेश्च संशयो भवति। यथा-साधारणाद् ऊर्ध्वत्वात् स्थाणुर्वा पुरुषो वेति, असाधारणाच गन्धवत्त्वात् पृथिवी नित्यानित्या वेति, वादिविप्रतिपत्तेश्च शब्दो नित्योऽनित्यो वेति । तत्र विप्रतिपत्तिहेतुकः संशयः प्रतिसाधनप्रयोगे प्राप्त इत्यनेकान्तिकेष्वेव प्रकरणसमोऽन्तर्भावयितव्यः। तस्य चास्य सप्रतिसाधनस्यैकेनैव हेतुना प्रतिकूलसाधने विरुद्धाव्यभिचारी नामावान्तरजातिः। यथा- क्षित्यादिकं सकर्तृकं कार्यत्वाद् घटवदित्यत्र 'क्षित्यादिकमीश्वरकर्तृकं न भवति कार्यत्वाद् घटवदिति। अत्र हि कार्यत्वं घटादिषु सकर्तृकत्वेनेवेश्वरकर्तृकत्वाभावेनाप्यव्यभिचरितम् । ईश्वरकर्तृकत्वाभावश्च सकर्तृकत्वमुखेनेश्वरं साधयतां तेषां विरुद्ध एवेति विरुद्धाव्यभिचारित्वं कार्यत्वस्य।

एवं परोदितैरेव पक्षहेतुनिदर्शनैः ।

विरुद्धसाधनेऽस्माकं विरुद्धाव्यभिचारिता॥ ७० ॥

सर्वसत्प्रतिपक्षाणां विरुद्धाव्यभिचारिताम् ।

कदाचिदूचुराचार्या न त्वमुष्यैव केवलम् ॥ ७१ ॥

चिदानन्देन तु व्यक्तमयमेव तथोच्यते ।

यथातथास्तु नामैतन्नाभासान्तरमत्र नः ॥७२ ॥

तत् सिद्धं बाधितविशेषणेऽनैकान्तिके वान्तर्भूतं सप्रतिसाधनत्वं नाम दूषणम् । भासर्वज्ञस्तु स्वपक्षपरपक्षसिद्धावपि त्रिरूपो हेतुः प्रकरणसम इत्युक्ता तत्र दुर्लभलब्धमेकमुदाहरणं दर्शयति । यथा - शब्दोऽनित्यः पक्षसपक्षयोरन्यतरत्वात् सपक्षवदिति । अत्र हि 'शब्दो नित्यः पक्षसपक्षयोरन्यतरत्वादि'त्यपि वक्तुं शक्यमिति । तदिदमयुक्तम् । इह खलु पक्षसपक्षयोरन्यतरत्वादित्यस्यानित्यत्वे साध्ये शब्दघटयोरन्यतरत्वादित्यर्थः । नित्यत्वे तु शब्दाकाशयोरन्यतरत्वादित्यर्थः । अतः कथमेक एव हेतुः पक्षद्वयेऽपि समान इत्युच्यते ।

शब्दसादृश्यमेवात्र विद्यतेऽर्थस्तु भिद्यते ।

तस्माद् विरुद्धधर्माभ्यां व्याप्ति कस्य सम्भवेत् ॥ ७३॥

कथं तर्हि भवान् ब्रूते विरुद्धाव्यभिचारिणम् ।

सत्यं न साध्यते तत्र साक्षात् साध्यविपर्ययः ॥७४३॥

सकर्तृकत्वं वदतामिष्टा हीश्वरकर्तृता।

सैवात्र वार्यतेऽस्माभिरोनार्थात् प्रतिकूलता॥ ७५३ ॥

भवांस्त्वनित्यनित्यत्वे साक्षादेव विरोधिनी।

एकेन साधयन्नद्य हास्यतामेव यास्यति॥ ७६३ ॥ इति।

यस्तु बाधितविषयापरपर्यायः कालात्ययापदिष्टो नाम हेत्वाभास उक्तः 'अग्निरनुष्णः अंद्रव्यत्वादि'त्यादिः, सोऽपि बाधितविशेषणो नाम पक्षाभास एव।

ननु नो पक्षदोषानेवानुमन्यामहे वयम्।

पक्षदृष्टान्तदोषाणां हेत्वाभासेषु योजनात् ॥७७॥

तत्र सिद्धविशेषणे तावत् –

पक्षः खल्वाश्रयो हेतोन च निश्चितधर्मवान्।

पक्षत्वं भजते तस्मादाश्रयासिद्धिरेव सा ॥७८॥

तथैव यदि दोषः स्यादप्रसिद्धविशेषणः।

तदापि पक्षतानाशादाश्रयासिद्धिरुच्यताम् ॥७९॥

किञ्च,

किं पक्षदोषैः कथितैरिदानी दृष्टान्तदोषा अपि वक्ष्यमाणाः।

अन्तर्गता एव हि हेतुदोषे न हेतुदोषादपरोऽस्ति दोषः॥ ८०॥

तदेवं सर्वदोषेषु हेत्वाभासप्रवेशिषु ।

निःसहायः कथं तिष्ठेत् स बाधितविशेषणः ॥८१३॥

तस्मादितरदोषवद् बाधितविशेषणोऽपि हेत्वाभासतयैव वक्तव्य इति । अत्र ब्रूमः।

आभाससङ्करे तावत् पुरः स्फुरितदूषणम् ।

उद्भाव्यमिति सर्वेषां निर्विवादं हि वादिनाम् ॥८२॥

ततश्च पक्षवचने दोषः कोऽपि चकास्ति चेत् ।

पक्षस्यैव स वक्तव्यः किं न्यायं नानुमन्यते ॥८३ ॥

पक्षदुष्टत्वमाश्रित्यैवोक्ता सिद्धविशेषणे ।

वयापि ह्याश्रयासिद्धिः किं पुरो भावि तत्र ते ॥८३॥

एवं साध्यस्याप्रसिद्धिस्तथा बाधितसाध्यता ।

पक्षोक्तावेव निर्भातीत्युचिता पक्षदोषता ॥ ८५ ॥

इत्थं दृष्टान्तदोषाश्च वक्ष्यमाणाः समर्थिताः।

यो यत्र स्फुरितो दोषः स तस्यैवेति निर्णयात् ॥८६॥

नावदत् पक्षदोषादीनक्षगदमुनिः पुरा।

तद्भक्तिमोहिता मा मा न्यायं त्यजत तार्किकाः ॥८७॥ इति।

तस्माद् बाधितविशेषणः पक्षाभास एवेति न पञ्चमो हेत्वाभासोऽङ्गीकार्य इति । ये पुनरनुकूलतर्काभावे हेतोः प्रयोजकत्वं नास्तीत्यप्रयोजकं नाम हेत्वाभासान्तरमातिष्ठन्ते, तेऽपि व्याप्यत्वासिद्धमेव तथा मन्यन्ते । सर्वेष्वप्यनुमानेष्वनुकूलत:र्व्यभिचारशङ्कामपणस्य निरुपाधिकत्वं स्थापनीयम् । ततस्तदभावे निरुपाधिकसम्बन्धानिश्चयाद् व्याप्त्यसिद्धिरेव । सोऽयं व्याप्त्यसिद्धो हेतुरुपाधिमानित्यन्यथासिद्ध इत्यप्रयोजक इति परप्रयुक्तव्याप्त्युपजीवीति सन्दिग्धव्याप्तिक इति च व्यपदिश्यते, न त्वाभासान्तरमिति । यत्तु भासर्वज्ञेनोक्तं-साध्यासाधकः पक्ष एव वर्तमानो हेतुरनध्यवसितः। यथा-नित्या भूर्गन्धवत्त्वादिति, सर्वं क्षणिकं सत्त्वादित्यादि च। तत्रादिमः प्रकारोऽसाधारण एव। 'सर्वं क्षणिकं सत्त्वादि'त्यत्र तु सर्वस्य पक्षीकृतत्वात् सपक्षभूतं विपक्षभूतं वा किञ्चिन्नास्तीत्यन्वयव्याप्तियतिरेकव्याप्तिर्वा न वक्तुं शक्येति व्याप्त्यसिद्धिरेवेयं, न वाभासान्तरमित्यास्तामेतत् । तस्मादस्मदुक्तैव हेलाभासव्यवस्थेति । अथ दृष्टान्ताभासाः।

साध्यसाधनयोातिप्रतिपत्तिस्थलं हि यत्।

तदुदाहरणं नाम दृष्टान्त इति चोच्यते॥ ८८३ ॥

तद् द्विविधं साधर्म्यवैधर्म्यभेदात् । तत्र साधनस्य साध्येनान्वयोपदर्शनं साधर्म्यम् । यथा - यो धूमवान् सोऽग्निमान् यथा महानस इति । साध्याभावस्य साधनाभावेनान्वयोपदर्शनं वैधर्म्यम्। यथा - योऽग्निमान् न भवति नासौ धूमवान् यथा पाथ इति । साध्यहीनः साधनहीनः उभयहीनः आश्रयहीन इति साधोदाहरणाभासाश्चत्वारः। तद् यथा - नित्यो ध्वनिः अकारणत्वाद् यदकारणं

तन्नित्यमिसत्र प्रागभाववदिति साध्यहीनः, प्रध्वंसवदिति साधनहीनः, घटवदित्युभयहीनः, नरशृङ्गवदित्याश्रयहीनः । नित्यत्वमत्राविनाशित्वमेव विवक्षितं, न *कोटिद्वयराहित्यम् । वैधोदाहरणाभासा अपि साध्याव्यावृत्तादयश्चत्वारः। यथा-~यन्नित्यं न भवति न तदकारणमित्यत्र यथा प्रध्वंस इति साध्याव्यावृत्तः, यथा प्रागभाव इति साधनाव्यावृत्तः, यथा गगनमित्युभयाव्यावृत्तः, यथा नरशृङ्गमित्याश्रयहीनः । अत्र चोभयविधोदाहरणेऽपि अव्याप्त्यभिधानं विपरीतव्याप्त्यभिधानमिति च हौ दोषौ । तत्र 'अग्निमान् पर्वतः धूमवत्त्वाद् यथा महानस' इत्येतावदुक्तेऽव्याप्त्यभिधानं, 'यो धूमवान् सोऽग्निमानि'ति व्यातेरनुक्तत्वात् । तथैव 'योऽग्निमान् न भवति, नासौ धूमवानि'ति व्याप्तिमनुक्तैव 'यथा महाह्लद' इत्येतावत्युक्तेऽप्यव्याप्त्यभिधानम् । यदा तु 'यो धूमवान् सोऽग्निमानि ति वक्तव्ये 'योऽग्निमान् स धूमवानि'त्युच्यते, तदा विपरीतव्याप्त्यभिधानम् । योऽग्निमान् न भवति, नासौ धूमवानिति वक्तव्ये यो धूमवान् न भवति, नासावग्निमानिति प्रयोगेऽपि द्रष्टव्यमिति ।

अनुमानप्रपञ्चोऽयं बहुभिर्बहुधोदितः।

चिदानन्दोक्तरीत्या तु मयैवमिह दर्शितः ॥ ८९॥

इति मानमयोदये प्रमाणपरिच्छेदेऽनुमानपरीक्षा

♣♣♣♣♣♣♣♣♣♣♣♣♣